आयतिः

समकालिकसंस्कृतकाव्यानां सङ्ग्रहः

सम्पादकः
राधावल्लभः

R/506

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

आयतिः

समकालिकसंस्कृतकाव्यानां सङ्ग्रहः

सम्पादकः
राधावल्लभः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

प्रकाशकः
कुलसचिवः
राष्ट्रियसंस्कृतसंस्थानम्
56-57, इंस्टीट्यूशनल एरिया
जनकपुरी, नवदेहली-110058

© राष्ट्रियसंस्कृतसंस्थानम्

ISBN : 81-86111-65-4

प्रथमसंस्करणम्, 1991

परिवर्धित-संस्करणम्, 2009

मूल्यम् : 35/- रु०

मुद्रकः
अमर प्रिंटिंग प्रेस, दिल्ली-9
दूरभाष : 9871699565, 9891709217

भूमिका

आयत्याः प्रथमं संस्करणं 1991 ई० वर्षे प्रकाशितम्। संस्करणमिदं सम्प्रति दुष्प्राप्यम्। अथ सङ्कलनमिदं विश्वविद्यालयानुदानायोगेन संस्तुते स्नातकोत्तरसंस्कृतपाठ्यक्रमे निर्धारित इति अध्यापकाश्छात्राश्चास्यपुस्तकाय चिराद् अस्पृह्यन्त। राष्ट्रियसंस्कृतसंस्थानेन आयतेः परिवर्धितमिदं संस्करणं प्रकाश्य पूर्यते तेषामपेक्षा।

आयतिः सत्यं साम्प्रतिक्याः संस्कृत साहित्य सर्जनाया आयतिं सूचयति। वेङ्कटरामराघव-जानकीवल्लभ-रतिनाथझा प्रभृतिकवीनाम् अन्यथा दुर्लभा रचना अत्र सङ्गृहीताः। नवे युगे संस्कृतकाव्यधारायाः पथपरीवर्ताः नवोच्छलनं चात्रानुभाव्येत। मन्ये सङ्कलनेनानेन समकालिकसाहित्यसन्दर्भेषु संस्कृतस्य अवदानं सामर्थ्यं च समीक्षकैः स्वीकरिष्यते।

–राधावल्लभः

अनुक्रम :

1.	भट्टमथुरानाथशास्त्री	1
2.	वेङ्कटरामराघवः	9
3.	जानकीवल्लभशास्त्री	14
4.	बटुकनाथशास्त्री खिस्ते	20
5.	रतिनाथ झा	26
6.	अवस्थी बच्चूलालः	38
7.	जगन्नाथ पाठकः	48
8.	'अभिराज'-राजेन्द्रमिश्रः	53
9.	राधावल्लभः	60

भट्टमथुरानाथशास्त्री

भट्टमथुरानाथशास्त्रिणः पूर्वपुरुषा बाबी जी दीक्षितवर्या मोगलकाले आन्ध्रप्रदेशादुत्तरभारतं प्राप्ताः। 'देवर्षि' इत्यवटङ्कधरस्तेषां परिवारः काश्यां, प्रयागे, रीवानगरे, अनूपशहरे चोषित्वा बूँदीपुरीमाजगाम। बूँदीपतेर्बुधसिंहस्य राजसभारत्नं देवर्षि श्रीकृष्णभट्टः कविकलानिधिः शास्त्रिणः पूर्वजेषु वैदुष्येन कवित्वेन चातितरां प्रथितः। संस्कृते ब्रजभाषायां च समं कवयन् विंशतिप्रायाणां प्रबन्धानां प्रणेता श्रीकृष्णभट्टः जयपुर राजसभामपि 1675 ई॰ वर्षात् 1761 ई॰ वर्षपर्यन्तमलञ्चकार। अस्यान्ववाये जयपुरराजवंशेन विशिष्यसम्मानितः कविरभूत् मण्डनभट्टः। तस्यैव कुले लक्ष्मीनाथभट्टसुतस्य द्वारकानाथभट्टस्य भार्या जानकीदेवी मथुरानाथं 1889 ई॰ वर्षे प्रासौत्। साहित्योपाध्यायपरीक्षां 1901 ई॰ वर्षे, प्रथमश्रेण्यां सर्वप्राथम्यमवाप्य व्याकरणशास्त्रिपरीक्षां तस्मिन्नेव वर्षे, व्याकरणोपाध्यायपरीक्षां च 1903 ई॰ वर्षे समुदतरन्मथुरानाथः। 1906 ई॰ वत्सरे पञ्चाम्बुविश्वविद्यालयस्य शास्त्रिपरीक्षायां सर्वप्रथमः, 1909 ई॰ वर्षे साहित्याचार्यपरीक्षायां साफल्यमभजत्। अनन्तरमयं जयपुरस्थमहाराजसंस्कृतमहाविद्यालये प्राध्यापकपदं समलङ्करोति स्म, संस्कृतपाठशालानिरीक्षकपदेऽपि वर्षत्रयं कार्यमकरोत्। पञ्चसप्ततिवर्षीयोऽयं 1964, ई॰ वर्षे दिवङ्गतः।

संस्कृत-हिन्दी-व्रज-भाषासु समं रचनायां ससार अस्य लेखनी। भारतीयसङ्गीतशास्त्रेऽप्ययमबाह्यः आकाशवाण्याः कृते ध्रुवपदगीतानि ठुमरी दादरादीनि च विरचितवान्। उर्दू-बङ्ग-गुर्जरादिभाषाणामपि साहित्यमधीतवान्। घनाक्षरी-कवित्त-सवैयादिब्रजकाव्यप्रचलितानां छन्दसां माधुर्यमनेन संस्कृते इदम्प्रथमतयाऽवतारितम्, 'गजल'-गीतेर्मसृणता बन्धश्च सम्यगभ्यस्तः। 'साहित्यवैभवम्' (1930), जयपुरवैभवम् (1947), गोविन्दवैभवम् (1957) चास्य बृहत्कायानि संस्कृतकाव्यसङ्कलनानि

प्रत्यग्रोन्मेषमनोहरां प्रतिभां प्रमाणयन्ति। संस्कृते आधुनिक लघुकथासाहित्यमसौ विपुलं ससर्ज। आकाशवाणीरूपकप्रणयनेन, संस्कृतरत्नाकर-भारत्यादिपत्राणां काव्यमाला-शृङ्खलायाश्च सम्पादकत्वेन, रसगङ्गाधरप्रभृतिग्रन्थानां टीकाकर्तृत्वेन, पाण्डुग्रन्थाना-मुद्धरणेन, नाट्यनैपुण्येन, गद्यबन्धैश्चाप्रतिमां कृतित्वततिं ततान। शताधिकाः संस्कृतलघुकथाः, दशाधिका उपन्यासाः, नैके ललितनिबन्धाः, व्यङ्ग्यलेखा यात्रावृत्तानि चास्य नूतनविधासु प्रवृत्तिं बहुमुखीं प्रतिभां च प्रमाणयन्ति।

1. प्रकृतिपर्यवेक्षणम्

(सुजन-दुर्जन सङ्कीर्तनम्)

वहते न कलङ्कलङ्घनं
सहते न प्रतिपक्षसंक्षयम्।
सुजनो विधुनोति तां श्रियं
शशिनोऽप्येष नितान्तकान्तिमान् ॥1॥[1]

परितः पिहितोऽपि दुर्जनैः
सुजनस्तान् स्वगुणैरनर्घयेत्।
अपि निम्बकदम्बनिह्नुतः
सकलांश्चन्दनयेद्धि चन्दनः ॥2॥[2]

न विमुञ्चते दुर्जनो निजा-
मिह निर्हेतुकवैरकारिताम्।
सुजनोऽपि च नो विमुञ्चते
निजनिर्मायपरोपकारिताम् ॥ 3॥

सुजनो हि परीक्षणे विपत्
प्रतिपन्नोऽपि तनोति पुण्यताम्।
निकषे कषितं च निर्दयं
कनकं काञ्चन भासमर्पयेत् ॥4॥[3]

अधिकाधिकमुज्ज्वलं वहन्
ननु रूपं भवति प्रियः सताम्।
मुकुरः किल भूतिमर्दितः
सुजनो दुर्जनदुर्वचोऽर्दितः ॥5॥

कटुकूटवचो - निपीडितः
सुजनो दुर्नहनैः सुदुर्जनैः।
न भिनत्ति निसर्गसौरभं
घनघृष्टो हरिचन्दनो यथा ॥6॥[4]

प्रियमावहते हि विच्छलं
सुजनो हन्त न लक्षितोऽपि सन्।
मधुरं रसमुद्गिरत्यसौ
तिमिरेऽप्यारसिता हि शर्करा ॥7॥

परितः परितापितोऽपि सन्
सुजनो नोज्झति शीलमात्मनः।
रुचिमावहते समुज्ज्वलां
कमनीयः कनकाञ्चलो यथा ॥8॥[5]

अपि दुर्जनजालकीलितः
सुजनोऽनक्ति महत्त्वमात्मनः।
अशुचौ भवनेऽपि शारदः
शशदृद् व्यञ्जयते निजां रुचम्॥9॥

परिताम्यति नो, न गर्हते,
वहते नाऽपि रुषं, न बाधते।
अपि दुर्जनदुर्विचेष्टितैः
सुजनः स्वे हृदये हृणीयते ॥ 10 ॥

('वर्णिका' रूपेण व्रजभाषाप्रसिद्धेन 'कुण्डलिया' छन्दसा)–

''सज्जनमैत्री सन्ततं स्नेहभरं पुष्णाति।
क्रमशो वृद्धिमुपागता दोषानपि मुष्णाति॥

दोषानपि मुष्णाति निर्गुणे गुणमाधत्ते।
निर्वेदं निर्वास्य मनसि सम्मोदं दत्ते।
सत्कार्येषूत्साहवर्द्धिनी जडताजैत्री।
स्नेहसार-विश्रम्भसन्तता सज्जनमैत्री ॥11॥

दुर्जनमैत्री पूर्वतः प्रीतिं प्रकटयतीव।
स्वार्थविभङ्गे कुत्रचित् स्नेहं विघटयतीव॥
स्नेहं विघटयतीव बहिः सद्भावं भजते।
मुखमात्रे मधुरत्वमेति हृदि कल्मषमयते।
असमये मित्रस्य गुह्यमपवादानेत्री।
स्वार्थमात्रसाराऽस्ति सखेऽसौ दुर्जनमैत्री ॥12॥

2. कवयः

शब्दा न स्फुरन्ति रचनासु नापि भाषा वशे
न पुनरशेषवृत्तबन्धे प्रभविष्यामः,
दासा इव नानुयान्ति वाचमनुप्रासा अपि
भावमनायासादभिव्यक्तुं नोल्लसिष्यामः॥1॥

'मञ्जुनाथ' मानसिकमोदोद्गारमेतं मञ्जु
कवितानिकेतं कृच्छ्रभावैर्भरयिष्यामः,
प्रस्थयवयोग एव विकलं व्ययतु वचो
निर्निरोधवाचो वयं कवयो भविष्यामः॥2॥

जन्मजातमेतत्काव्यबीजमुपलब्धं न वै
विश्रब्धं न सिद्धकविसेवामाचरिष्यामः।
शब्दशास्त्रदिव्यसौधभागान् कोणकोणावधि
भृशमनुरागान्नापि निर्भरं चरिष्यामः॥3॥

'मञ्जुनाथ' मोदोन्मदममृतपयस्वतीषु
सुकवि-सरस्वतीषु न स्वं विस्मरिष्यामः।
मार्जनमवापि नापि प्रतिभापि भावशतै-
रहह, तथापि वयं कवयो भविष्यामः॥4॥

प्रारम्भे प्रभिद्यमानकविताप्ररोहमाप्य
कविरिति मोहवशाद् दर्पमुपयामः किम्?।
कुहचन गीतिभिः क्वचिच्च हिन्दीवृत्तभरैः
सततमानन्दीभूतभाग्याः सम्भवामः किम्?॥5॥

'मञ्जुनाथ' नैसर्गिकसारस्वतसारजुषां
विदुषामुपेक्षयैव धृष्टाः सम्भवामः किम्?।
चापलचरित्रच्छटा ऽऽछन्नच्छवयोऽपिभूरि
भारतीविभवयोगिकवयो भवामः किम्?॥6॥

वचनविदग्धाः परसूक्तिदोषदर्शनेषु
मुग्धा निजकाव्यदोषमार्गणे समीक्ष्यते।
गुप्ता किल सकल सभासु स्खलन्ती मुहु-
र्वासकसज्जा तु पुनरेषा सुपरीक्ष्यते॥7॥

खण्डिता रसज्ञैः कलहान्तरिता सज्जनेषु
प्रायः कुटिलेषु सेयमुत्का समुदीक्ष्यते।
हंहो दुःप्रसाद कवि-पुङ्गव सरस्वती ते
जरती तथापि नव्यनायिकावदीक्ष्यते॥8॥

3. पण्डिताः

योजितावधानास्तत्परीक्षासरिदुत्तरणे
प्रष्टव्यानुसन्धानादमुष्मिन्नपि सिध्यामः।
ज्ञात्वा राजभाषां व्यवहारनैपुणाय ततो-
ध्यापनप्रसक्ताः क्रमवृद्ध्या सुसमृद्ध्यामः॥1॥

समितौ नदन्तो गुरुगाम्भीर्याभिमानभरा-
द्यत्किञ्चिद् वदन्तो बुधहृदयानि विध्यामः।
मान्यताभिमानमदमण्डितास्त्वरितमेव
संसदि समन्तान्महापण्डिताः प्रसिद्ध्यामः॥2॥

सविधे विमृष्यसे चेच्छेषनागमूर्तिधरां
दृश्यसे तु दूरादसौ मूर्तिमान् शमो दमः।

श्लोक मन्त्र-वार्त्तिकादिचर्चा मुहुरारभ्यते
तत्त्वमुपलभ्यते चेद् घोरं ते तमो भ्रमः।।3।।

'मञ्जुनाथ' वचसि च वेषे त्वं महर्षिसमो
मर्मपरिपेषे मुहुर्मनसि यमोपमः।
पूजागृहगुप्तीकृतगिरिजागिरीश!
सर्वपण्डितपुरीश! वरपण्डित, नमो नमः।।4।।

4. न गता

अयि चित्त चिरेण विचिन्तयतोऽपि
चञ्चलता न गता, न गता।
अपि नाम निरन्तर-यत्न-शतैस्तव
निष्ठुरता न गता, न गता।।1।।

कियदिच्छसि निर्भरशान्तिसुखं
न नियच्छसि पादमथाभिमुखम्।
अयि गच्छसि साधुपथाद् विमुखं
तव निष्क्रियता न गता, न गता।।2।।

क्षणमेव विमुह्यसि वामदृशा
न फलं परिपश्यसि दूरदृशा।
विमृशामि सखे यदि तत्त्वदृशा
तव कामुकता न गता, न गता।।3।।

नहि साधुजनैः सह संरमसे,
न फलं विमलं त्वमिहाऽऽवहसे।
चपलाय सखे यशसे यतसे,
तव दुर्मदता न गता, न गता।।4।।

अभिनन्दसि शास्त्रगतं न मतं
नहि निन्दसि सन्ततमात्महितम्।
बतनिन्दसि लोकहितं विमतं,
तव मत्सरता न गता, न गता।।5।।

हि दीनजनान् परितोषयसे,
बहुघोषयसे निजदानरुचिम्।
अयि चित्त सखे तव लोलुपताऽ-
नृतकीर्त्तिवितानगता न गता॥6॥

तब विस्वरगीतिमिहार्पयसे,
न विलोकयसे विवुधान् विविधान्॥
अधुनापि च मञ्जुलनाथ मनाक्
तव दुर्मुखता न गता, न गता॥7॥

5. वा न वा?

विरहापगातटमुत्तरं पुनराग-
मिष्यति वा न वा?
अयि मानसी मम वेदना
विषमा गमिष्यति वा न वा?॥1॥

मुहुरन्तरं विमनायते बत
वेदनापि भृशायते
सुचिराय ते किमियं दशा
वद निर्गमिष्यति वा न वा?॥2॥

विलिखामि मानसवेदनां
विसृजामि हन्त तदन्तिके
परमन्तरं परिशङ्कते स
विलोकयिष्यति वा न वा?॥3॥

अपि यासि चित्त तदन्तिके
तव सन्ति के सुहृदः सखे!
निखिले स्थले कुटिलाकुले सरलो
मिलिष्यति वा न वा?॥4॥

प्रहितः शरोऽस्ति शरासनान्निहितः
स मे परमे दृढम्।
अथमाहितं शरमन्तरादप-
सारयिष्यति वा न वा?॥5॥

नवपल्लवा विलसन्ति,
संविकसन्ति ते कुसुमोत्कराः।
मम भागधेयतरुः सखे सरसं
फलिष्यति वा न वा?॥6॥

अयि चन्द्रहासमिमं दधासि
जहासि वक्षसि मामके।
किमवैषि ते निशितोऽप्यसिर्मयि
सञ्चलिष्यति वा न वा?॥7॥

इयमेति घोरतमस्विनी
समुदैति गाढतमं तमः।
पुनरेष सौख्यदिवाकरो,
वत सम्भविष्यति वा न वा?॥8॥

अयि 'मञ्जुनाथ' मनो
विनोदय संगमेन सचेतसाम्।
अपि नीरसेषु जनेषु ते प्रणयो
भविष्यति वा न वा?॥9॥

---

1. कलङ्कात्-अपवादात्। लङ्घनं-तिरस्कारम्। प्रतिपक्षात्-शत्रोः। संक्षयं-हानिम्। चन्द्रपक्षे - प्रतिपक्षं-प्रत्येकपक्षे। संक्षयं-कलाहानिम्।
2. अनर्घयेत्-निर्दोषान् कुर्यात्।
3. काञ्चन भासं-अनिर्वचनीयां कान्तिम्। सुवर्णपक्षे-सुवर्णकान्तिम्।
4. दुर्नहनैः-दुर्दमैः।
5. रुचिम्-उत्तमामिच्छाम्। कनकपक्षे-कान्तिम्। कनकाञ्चलः-कनकखण्डः।
6. अनक्ति-प्रकटयति।
7. ह्रणीयते-लज्जते।

वेङ्कटरामराघवः

वेङ्कटरामराघवः 22.8.1908 तिथौ तञ्जौरजनपदे तिरूवरूरग्रामे जनिं प्राप्तवान्। बाल्यादेवायं संस्कृतपण्डितानां सङ्गीतकाराणां च सान्निध्यमाप। महामहोपाध्यायश्रीकुप्पूस्वामीशास्त्रिणां शिष्येष्वयमन्यतमः। 1931 ई॰ वर्षे मद्रासविश्वविद्यालये तन्निर्देश एव शोधकार्यमारभत, तत्रैव च परस्तात् प्राध्यापकत्वेन नियोजितः। अयं संस्कृतरङ्ग-मद्राससङ्गीताकादमी-मद्रासनाट्यसङ्घ-प्रभृत्यनेक संस्थानां संस्थापकत्वेन साचिव्येन वा, संस्कृतप्रतिभा-संस्कृतरङ्ग-पुराणम्-प्रभृतिविविध पत्रिकाणां सम्पादकत्वेन तैस्तैः शोधप्रबन्धैर्विश्वसंस्कृतसम्मेलनादिसमायोजननैश्चाप्रतिमं कार्मण्यमाविश्चकार। मद्रासविश्वविद्यालयस्य स्नातकोत्तरपरीक्षोत्तरणेन पञ्चस्वर्णपदकानि, 1952 ई॰ वर्षे पद्मभूषणोपाधिं, 1966 ई॰ वर्षे साहित्याकादेमीपुरस्कारं तथैव च विविधविरुदावलिं सम्मानमानादिकमयमवाप। संस्कृतकवित्वेन-अवन्तिसुन्दरी, विकटनितम्बा, कामशुद्धिः पुनरुन्मेषः, प्रतापरुद्रविजयः महाश्वेता, विमुक्तिः, अनार्कली चेत्यादीनि रूपकाणि, श्रीमुत्तुस्वामीदीक्षितचरित महाकाव्यम्, परःशतानि च लघुकाव्यान्यस्य प्रतिभां प्रमाणयन्ति।

1. पुलकमेति कश्चित् कविः

त्वदीयकरुणावशात् श्वसिति याति सञ्चेष्टते
नपुंसकनरः कियत् स्वभुजमेदसा माद्यति।
शवं वपुरिदं च सङ्कुचितचर्मदुर्भस्त्रिकां
प्रपूर्य मरुता त्वया तत इतः पदा क्रीड्यते॥1॥

विचिन्त्य पुरुषायितं लुठनमत्र तत्र क्षणं
जडा मुदमुपैति वा श्रमहतापि वा नश्यति।
इयं तव तपस्विनी परमपुंस आस्याम्बुजे
दयापहसितस्मितं नरवधूर्न चालोकते॥2॥

अधः पदपथस्य मृत्, जलमिदं च यत्पाल्वलं
महानसकरीषगो ज्वलन एष रथ्याचरः।
वृथाट्यपवनस्तथा तत इतश्च यत् खं त्वया
कृतं भुवनवैभवं कथममूभ्य एतादृशम्॥3॥

तृणस्य हरितिम्नि तत् तृणनताग्रचूडीभव-
त्सहेन्दुमिहिकामणेरपि च विस्फुरत् तद्द्युतौ।
मणिं तमनुरञ्जयन् स्पृशति यश्च कल्ये करः
प्रकम्प्ररुचि तस्य च प्रसरभिन्ननानात्विषः॥4॥

पदे पद इतीह ते परमफल्गुवस्तुन्यपि
स्फुरन्ति सुषमा विभो तव विभूतिलीलालवाः।
इमा अखिलशिल्पिनामधिपतेश्च चिन्तातिगा-
विलोक्य तव चिन्तयन् पुलकमेति कश्चित् कविः॥5॥

2. अन्यापदेशाः

ग्रीष्मव्योम्नि दिनावसानविगलत्सूर्यांशुकल्माषिताः
पाथोदा रटितस्फुटत्तटवियत्प्रान्ता अटां कुर्वते।
तान् दृष्ट्वा किमु नीलकण्ठपरिषत् नृत्तोत्कतां विन्दते
नीपः फुल्लति किं, किमध्वगकुलं चौत्सुक्यतः स्पृश्यते?॥1॥

अस्या अस्ति सुसङ्क्रमस्तटभुविन्यग्रोधशीते स्थले
निःश्रेणी च शिलामयी निवसनप्रक्षालनायोपलः।
मुद्रा चन्दनभूतिकुङ्कुमयुतो वाट्यां जपार्थं मठः
किं वैतैः सकलैश्च कश्चन न चेदन्तस्तटिन्यां रसः॥2॥

अर्चाम्येष सुमैः फलान्युप हराम्यच्छं पयः पीयतां
मन्दैर्गन्धवहैश्च शाद्वलतले विश्रामयाम्येष वः।
एह्येहीति वनी द्विजैस्तरुशिरोरूढैः समुद्घोषय-
त्येषोऽहं प्रविशामि तां, पथि कुतः, कस्त्वं श्वदंष्ट्राभिधः॥3॥[1]

---

1. लघुतीक्ष्णः कण्टक विशेषः।

हा अब्धे! कियतीह विस्तृतिरियं चापः कियत्योभव-
त्येकस्यापि कणस्य नः शमयितुं शक्तिस्तृषं वर्त्तते?
इत्थं त्वां परिदूषयत्ययि मुहुर्लोकः किमालोकते
योऽभ्रो जीवनदः स जीवनमदो लेभे त्वदेवेत्यसौ॥4॥

सत्यं दुस्सह एव धर्मकिरणस्तन्नाम विश्राम्यता-
दासन्ध्यं सुखमंत्र मौकलिकुलं छायासु नश्चत्वरे।
तत्किं दूषयति स्थलानि पिशितैर्निष्ठ्यूतवान्तैरिदं
तच्चाप्यस्तु, कुतो नु बुद्बुदयति श्रोत्राणि काकारवैः॥5॥

वृन्ते यान्ति पिपीलिकाः कतिपया रोहावरोहश्रमं
कीटाः केचन मूढमेव च दले स्वापं समातन्वते।
केऽप्यन्ये शलभा विधूय वदनैस्ताम्यन्ति किञ्जल्ककान्
एकः केवलमेष सून! मधुपो लेढि त्वदीयं मधु॥6॥

3. रुचिररुचिश्च

यमेव यामेव तथा तथैकदा
स्तुवन्प्रपश्चन्नुपगूहते नरः।
तमेव तामेव स एव चान्यदा
विनिन्द्य तद्दृष्ट्यसहोऽपगच्छति॥1॥

गते दिने यत्र मुखाम्बुजे द्वशा-
वमाद्यतां तद्विषमद्य भासते।
कुतोऽपि तत्रैव मुखे समुन्मिषेत्
पुनर्मनोमोहनकान्तिधोरणी ॥2॥

तनौ तनौ दोषगुणौ विमिश्रितौ
विकारशोभे च तथैव तद्वशात्।
कदापि शोभैव विशिष्य तन्मुखे
विकार एव प्रथते कदाचन ॥3॥

इति प्रधानांशविवर्तहेतुना
वशीकृतो वा विरसीकृतोऽथवा।

यमेव यामेव जिहासति स्म भोः
तमेव तामेव दिदृक्षतेऽधुना ॥4॥

4. वाग्वादिनी सहस्त्रतन्त्री

राकासुधाकरकरावलिनालिकाभि-
रावर्जितामृतझरैरिव वर्धितस्य।
उत्तालताण्डवतरङ्गततेर्य एष
कोलाहलोऽम्ब जलधेः स तवाट्टहासः॥1॥

आगस्त्यदिक् प्रसृमरानिलपूरितेभ्यो
वंशप्ररोहसुषिरेभ्य उदेति या सा।
गीतिस्तवैव सुमपर्णविचित्ररत्न-
सिंहासनोपरि लसद्वनदेवतायाः॥2॥

कुञ्जात् चलत्प्रसवमांसलशाखिकाग्र-
डोलारसानुभवरक्तपिकावलीभ्यः ।
आशा प्रशाम्यदवकाशतरङ्ग्यमाणो
यः पञ्चमो हृदयचुम्बि शरः स्वरोऽयम्॥3॥

शाखासु कन्दलदमन्दसुमेन नीप-
वृक्षेण साकमुदयिन्यसिते पयोदे।
सान्द्र प्रमोदतरलः प्रचलाकिवर्गो
यः कूजतीह स च षड्जगभीरनादः॥4॥

वासन्तिकश्रिय उदङ्घ्रितलावघात-
फुल्लल्लतावलिवलल्ललितालिजृम्भी।
रीङ्कार एष य उदीर्णमनोजमौर्वी-
नादः समुत्सुकितसर्वसचेतनं च॥5॥

वल्लीनियन्त्रिततरङ्गतुरङ्गयुक्ते
सूतन्मधो मलयवायुरथे निविश्य
छत्रत्सुधाकरमपि व्यजनायमान-
काशप्रसूतमुपयान्तमनङ्गरागम् ॥6॥

अन्येऽपि ये द्विजगणाः प्रतिशाखिसंस्थाः
प्रत्युद्व्रजन्ति परितः स्तुतिपाठकामाः।
आपादिताखिलचिदात्मकलोकचित्त-
क्षोभैश्च यैः स्तवनगीतिपदैरमीभिः॥7॥

सर्वा अमूः सरसनादभरोर्मिमाला
आभावुकीकृत शिलात्मकजीवलोकाः।
अम्ब ! त्वदङ्गतलशालिसहस्रतन्त्री-
व्यास्फालमूर्च्छितनिरन्तररागमालाः ॥8॥

5. मनोरथः

उपर्युपर्युदञ्चते मनोरथो मनोहरः।
क्षणेन बुद्धदप्रभं तथा तथा विलीयते ॥1॥

स स स्फुरन्नितस्ततो मनोवनान्तसीमसु।
कुरङ्गपोतसुन्दरं भ्रमत्यहो ममाशयः ॥2॥

दिनान्तमल्लिकेव मे मतिर्विकस्वरा क्षणम्।
सगन्धलक्ष्मि राजते विशीर्यते क्षणादहो ॥3॥

6. 'एकाकी न रमते'

पूर्णेऽपि सौध इह सौधकरे न पूर्ण
चेतोऽत्र निःश्वसिति किञ्चन मार्गतीव।
विश्रान्तिदायिनि च वारिधिसैकतेऽत्र
शून्यं मनो भवति, शून्यमिदं हि पार्श्वम् ॥1॥

चारूण्यमूनि कुसुमानि न वल्लरीषु
चारूणि बम्भरकचेषु कृतार्थितानि।
आत्मैव सर्वगुणशाल्यपि न प्रियोऽसौ
नूनं परप्रियतया हि स च प्रियो नः ॥2॥

जानकीवल्लभशास्त्री

कवितल्लजोऽयं बिहारप्रदेशस्य गयाजनपदान्तर्वर्तिनि मैगराग्रामे 5-1-1916 दिनाङ्के जनिमलभत। अस्य पितृचरणा रामानुग्रहशर्माणो विपश्चिदपश्चिमाः स्वयमेनं बाल्ये पाठयामासुः। अष्टादशवर्षीयोऽयं साहित्याचार्यपरीक्षामुदतरत्, काश्यां हिन्दूविश्वविद्यालये चाध्यगीष्ट। आचार्यपरीक्षायामयं विहारोत्कलप्रान्तयोः सर्वप्रथमं स्थान लेभे। द्वादशवर्षदेशीयस्यैवास्य संस्कृतकाव्यरचनावल्लरी अङ्कुरिता पल्लविता च। 1935 ई॰ वर्षे "काकली" ति संस्कृतकाव्यसङ्कलनं प्राकाश्यमानीयायं संस्कृतसाहित्यसर्जनाया नूतनां दिक् समुन्मीलयामास। अस्य रचनासु गेयता, लयः, प्रवाहः, जयदेवादीनामिव सरसमधुरकोमलकान्तपदावली, नवीना अर्थच्छटा, युगबोधः, हिन्दी-काव्यधारायाश्छायावादस्य स्वच्छन्दतावादस्य च विच्छित्तिरिति भूयांसोऽनन्यसामान्यगुणाः स्फुरन्ति। हिन्द्यामपि विपुलं साहित्यमनेन विरचय्य वाग्देव्या अपूर्वमाराधनमकारि। संस्कृते प्रभूतमस्य साहित्यमप्रकाशितं विद्यते।

1. वाणीवन्दनम्

कलक्वणनकच्छपीरणनदत्तकर्णादरा-
द्दरोन्नतमुखी कलाकलितगीतिकागायने।
विभाकरविभानिभाकृतिमणिस्फुरच्छाटिका
प्रभाभिनववाटिका जयति सा जगन्नाटिका॥1॥

विलोचनविघूर्णनाद्विपुलविश्वसञ्चालिका
विवेकनयनम्रताललितसत्कलाशालिका।
स्फुरत्वनिशमेव मे मृदुलमालतीमालिका
त्रिलोकपरिपालिका मनसि वेधसो बालिका॥2॥

कुकर्ममकरावृते भुवनवारिधौ मज्जता
न्दयाकृतनिजोदयाऽमलकुतूहलात्पारदा।
समुल्लसतु मानसे मम विचारदाऽऽचारदा
स्वभक्तिरतिसारदानयविशारदा शारदा॥3॥

विधेहि विधिनन्दनि ! स्वरुचिकौमुदीनन्दिनी
सुखेन वचनावलीम्मम मुखे सुधारस्यन्दिनीम्।
कृपामयि ! कृपाकदम्बित-कटाक्षपाम्मुहु-
स्तवैव सगुणे! गुणावलिविलेखिनीं लेखिनीम्॥4॥

2. आशाः

पिधायाक्षिणी स्वच्छशोचिषी
सततं वर्धितपीडे।
विलुलिताभिलाषोऽपि निवत्स्या-
म्यद्य न निविडे नीडे॥1॥

सुखमस्वाप्सं जीवनमात्रं
मतिरपि निद्रामग्ना
अविश्वास्य! समदं चलता
चरणेन तवासौ भग्ना॥2॥

वञ्चनचञ्चो!चलति न चरण-
श्चेत् किं तव सोऽप्यचलत्?
पङ्गुं कृत्वा साङ्घ्रियुगलमपि
मां निर्दय किं न्वमिलत्?॥3॥

सङ्गोप्यैव सकलशक्तिं
मे निजसंस्थापितभक्तिः
धिग्विधाय पाखण्डं सफला
क्वचिद् भवत्यनुरक्तिः? ॥4॥

मुखमपि किं न निबद्धं,
किन्तु वदन् स्याः क्वचिदपि दृष्टः
धिग् दूषणशतमण्डितोऽपि
पण्डितः कथ्यते शिष्टः॥5॥

3. कलिके :

कृतसार्थाभिधवसुधाङ्के मृदि दधती सदाऽमरीत्वम्
मालिपालितलतालिलालितेऽमलपरिमलेऽसि का त्वम्?॥1॥

मञ्जुनिकुञ्जे ऽस्मिन् गुञ्जद्भृङ्गाङ्गानङ्गितकाया
किमसि महीयसि परब्रह्मणो मनोमोहिनी माया?॥2॥

शिशुहृदये निहनूय सहृदयहृदयभावानविभावा
अनुभूयात्मनि रहसि हससि निह्नुतनवरसानुभावा?॥3॥

दधदयि यञ्ज्योतिश्च्योतितरसधानकौशलं सविता
चषति रसं, सरसा प्रसरति सा ते परिमलकलकविता॥4॥

दिशि दिशि किरन् लोकलोभनीयं कवितामकरन्दम्
वाति समीरोऽधीरामोदो मोदान्मन्दं मन्दम्॥5॥

वरवृन्ते नृत्यन्ती नतलतिकानन्दं जनयन्ती
मुनिमानसेऽपि मोहन-भावं सततं ततं नयन्ती॥6॥

चुम्बस्युच्छ्वासैर्न विलासैस्ततस्स्थिरापि रसाऽभूत्।
त्वमसि तेन नन्दनेदृशी सम्प्रति कुञ्जस्य दशाऽभूत्॥7॥

गन्धमृगीव निजाङ्गसुगन्धौ भ्रान्ता किं वनमाले!
पश्यसि मुहुर्मुहुस्तिर्यग् वलिताक्षी यन्निजजाले?॥8॥

किमीक्षसे काभ्यां दृग्भ्यां दृश्यसे जनैर्महनीया?
क्षन्तव्या साम्प्रतमशेषदेशीयदशा दयनीया॥9॥

किं पश्यसि, पश्यति किं लोकोऽलिं पार्श्वस्थं लोभात्!
कमलदलन्त्वां जाने तज्जलममलमहं स्थल लोभात्!॥10॥

देवि विलोके ते रूपे दैवतललनालावण्यम्
सततं चमत्करोति सचेतश्चेतो मामपि वन्यम्॥11॥

सुन्दरसौन्दर्यधृतौ लोके प्रकृतेः कृतेर्विकासम्
हासं वनदेव्याः वन्द्यं वृन्दारकवृन्दविलासम्॥12॥

कुसुमवाटिकानाटिके त्वदङ्के प्रेक्षे गुरुगन्धम्
लघुभारो भवितास्मि धेहि कृपया मे गौरवगन्धम्॥13॥

4. दीनो मीनः

तव नवलावण्याम्बुधिसलिले लवलीलया विलीनः
दोलाकालविलोलापाङ्गो मे चञ्चललोचममीनः॥1॥

कियत्कालमुत्प्लवनं कृत्वा रागसागरे दीनः
मग्नो मन्दं मन्दं पीत्वा तद्रसमभूच्च पीनः॥2॥

रक्तं सान्द्रपदं विहरन्तं तं लब्धुं तत्कालं
निजकेतनोपयुक्तमनङ्गो विस्तारितवान् जालम्॥3॥

बद्धो हन्त स एष साम्प्रतं निर्गन्तुं हा नालम्
विक्रेतुं गच्छति तद्दयिता धृत्वेन्दीवरनालम्॥4॥

वामेऽवामे करे तद्युक्तं पत्रनिर्मितं पात्रं
वदति-'गृहाण स्पृहणीयं नवमीनं काञ्चनगात्रम्॥5॥

पश्यन्त्वत्र भवन्तो रचनापाटवं च वैधात्रम्''
हासं हासं वदति च मूल्यं 'सदयहृदयहृन्मात्रम्'॥6॥

दयित! विधाय दयामयि! मयि कश्चिद् विषयो नोशोच्यः
द्विगुणितमपि मूल्यं दत्वा दीनो मीनो मे मोच्यः॥7॥

दोलाकालविलोलापाङ्गो मञ्जुललोचनमीनः।
तव लावण्याम्बुधिसलिले लवलीलया विलीनः॥8॥

5. भग्नावशेषः

इष्टिके! किमिष्टं पश्यसि? नश्यति जीवनं समेषाम्
त्वमिव त्वन्निर्मातृणामपि सैव दशाऽभूत् तेषाम्॥1॥

किं मिलसि मृत्तिकायां त्वं गत्या जितशम्पाकम्पा
मृदि मिलितास्त्वन्निर्मातारस्त्वयि वर्धितानुकम्पाः॥2॥

प्रस्तर! पश्यसि किं सारं? संसारान्मा विमना भूः
प्रस्तरीविहितनिजहृदयैर्विगतैस्तै कृता रसा भूः॥3॥

भित्ते! दीर्यसे कियन्ति त्वयि जीवनानि जीर्णानि!
हृदयानि गच्छतान्तेषामयि तुम्यमेव दीर्घानि!॥4॥

कौशिक! लोकस्यास्य त्वं नवकौशिकोऽसि कुरु शब्दम्!
झङ्कृता पुरा वीणानामत्रैव गुणाः कियदब्दम्॥5॥

निस्सरताधुना समीक्षाकर्त्तुर्नो शोकोच्छ्वासाः
स्नेहोद्गारामोदैरपि वासिता प्राग् यदावासाः॥6॥

भग्नावशेष! किं पश्यसि पुष्करं हन्त तच्छून्यम्
उज्ज्वलिताक्षरैर्विलिखितं हृदि चरितं ते पुण्यम्॥7॥

उद्भ्रान्तपथिक! पश्यैहि त्वज्जगतो जीर्णं गेहम्
मूर्च्छितं जीवनं, शून्यामाशां, मृतमीप्सितदेहम्॥8॥

6. भ्रमरगानम्

इन्दिन्दिर, निन्दसि मकरन्दम्?
पीत्वा पूर्वमपूर्वप्रेमपूर्वकमयि मन्दं मन्दम्।
इन्दिन्दिर, निन्दसि मकरन्दम्।

कलकलिकेयं वरवृन्तेन सुखं सुप्ता शिलिताऽऽसीत्
दासीकृतनलिनेनेषन्नयनेन भुवं स्वच्छन्दम्-
पश्यन्ती वश्यं त्रिलोकमाकर्षन्ती सानन्दम्।
इन्दिन्दिर, निन्दसि मकरन्दम्।

सरसि निविश्य मुखं सुखं चुचुम्बिथ नवरसं चषन्
सन्
सन्मुखमसाम्प्रतं साम्प्रतमपि कृतवानन्वरविन्दम्-
विन्दन्नानन्दं परात्परं कमपि नवीनममन्दम्
इन्दिन्दिर, निन्दसि मकरन्दम्।

असमय उल्लासं विकासमपि तव सङ्गमादवापत्
नवापदापि पदन्निहितं तज्जीवनाङ्गने मन्दम्
धृत्वा शिरसि परागरागमपि साऽविन्दन्नानन्दम्-
इन्दिन्दिर, निन्दसि मकरन्दम्?

7. राधालास्यम्

आश्लिष्याङ्गैस्समग्रैश्श्रियममलदलत्पद्मकोषे निषण्णा
पादप्रान्ते समतान्मुखरमधुकरैर्वन्दिभिर्नन्द्यमाना
सौरभ्याधाराधीरनिलचलमुकुलस्रग्धरा सुप्रभाते
वाग्देवीवापरा सा हरिमुखसुषमाराधिका राधिकेयम्॥1॥

ज्योत्सनास्नाते निशीथे किसलयशयिते मर्मरे स्निग्धसान्द्रे
चान्द्रम्पीयूषमाचामति चटुलचलच्चञ्चुचञ्चच्चकोरे
वेल्लत्कल्लोलमालाकलकलकलिते यामुने श्यामकूले
मन्दं मन्दं कदम्बं स्पृशति मधुमये माधवीये समीरे॥2॥

किं किं किं किङ्किणीनां कण-कणरणनं कङ्कणद्वन्द्वबन्धि
श्रावं श्रावं विरावं चलचरणमिलन्मञ्जुमञ्जीरजातम्
लीलाशीलालिलोलत्करतलकलितोत्तालतालं सहास्यं
लास्यं श्रीराधिकायास्तिरयतु दुरितं मानसं मानवानाम्॥3॥

परीरम्भारम्भाद्विकचकुचकुम्भाम्बरतर –
द्वयत्ताराकाराभिनवमणिहारं प्रतिपदम्।
तले ताले कूजत्क्वणिकमुपरि स्वर्णरशना–
स्वनं श्रीराधायाः सकलकललास्यं सुखयतु॥4॥

श्रमजलकणजालैर्भूष्यमाणाननायाः
श्रुतिसरसि सपद्मे त्युत्कमीनेक्षणायाः
स्फुरदधरमुदञ्चद्भूतलं राधिकायाः
भवतु भवविभूत्यै लास्यमुल्लासभासि॥5॥

बटुकनाथशास्त्री खिस्ते

खिस्तेमहोदयः 1918 ई॰ वर्षे नवम्बरमासस्य त्रिंशत्तारिकायां जनिमलभत। अस्य पितृचरणा नारायणशास्त्रिणः काश्यां पण्डितमण्डले मूर्धायमाना आसन्। म॰ म॰ दामोदरलालगोस्वामिभालचन्द्रशास्त्रि-प्रभृतिविपश्चिद्वर्याणामयं सुयोग्योऽन्तेवासी खिस्तेमहोदयश्चिरं वाराणसेय-संस्कृत-विश्वविद्यालये साहित्यविभागेऽध्यापनदायित्वं निर्वहति स्म। दैवपरिणामात् 29.01.2000 तमे कविः कीर्तिशेषः संवृत्तः सूर्योदय-प्रभूति-पत्रिकास्वस्य रचना भूयसा प्राकाश्यमागताः।

1. जयति कालिदासः कविः

तुषारगिरिशेखरस्त्रवदमन्दमन्दाकिनी –
प्रवाहरसमाधुरी सहजमाधुरीतिस्पृशः।
गिरः सहृदयाशयं सुरभयन्ति यस्यानिशं
स भारतशिरोमणिर्जयति कालिदासः कविः॥1॥

क्वणत्कनकनूपुरोच्चलितचारुसिद्धाङ्गना –
कदम्बकसमन्विता तुहिनशैलमालान्तरे।
यदीय कवितानटी त्रिदशवृन्दनेत्रोत्सवं
विवर्धयति कौतुकात् स खलु कालिदासः कृती॥2॥

प्रसन्नशशिशेखरार्पितशशाङ्कलेखारसैः
प्रसूनशरचेतनामभिनवां विनिर्माय किम्?
व्यधाद् भुवि शकुन्तलां भुवनलोभनीयामसौ
कवीन्द्र-कुल-वन्दितो जयति कालिदासः सुधीः॥3॥

असह्यविरहव्यथाविकलयक्षरक्षाविधौ
विधौतहृदयो दयोपनतदूतभावोऽम्बुदः

कुवेरनगरीमगाद् यदुदितेन दीर्घाध्वना
स कारुणिकशेखरो लसति कालिदासः कृती॥4॥

यदि वहसि पिपासां काव्यपीयूषपाने
मतिमुकुरमलानां मार्जनं चेन्मतं ते।
निरुपम-निगमार्थोन्मेष-चन्द्रातपश्री-
विलसितमधुमासः सेव्यतां कालिदासः॥5॥

2. जयत्यसौ वसुन्धरा

तुषारशैलशेखरप्रभालसद्दिगन्तरा
स्त्रवत्तरङ्गिणीसमा प्रसारहारभासुरा।
ललाटकुङ्कुमायितोदयानुरक्तभास्करा,
पवित्रसामसस्वरा जयत्यसौ वसुन्धरा॥1॥

यदीयभूरिसाहसप्रबन्धबन्धुरो गिरां
प्रवाह एष सत्त्वरं दिगन्तराणि गाहते।
स्वदेशरक्षणक्षणप्रदत्तपूतजीवितान्
स्मरामि तान् नरोत्तमानुपात्तलोकवन्दनान्॥2॥

यदीय मञ्जुमृत्तिका कणेषु जृम्भते चिरात्
प्रतापसिंहपौरुषं शिवाजिराजकौशलम्।
जगत्त्रयी विजित्वरी समस्तशत्रुघस्मरी
यदीय गौरवच्छटा जयत्ससौ वसुन्धरा॥3॥

विलोलवल्लरीमिलन्मिलिन्दवृन्दगीतयो
ध्वनन्ति कालिदासचारुसूक्तयो यदन्तरे।
रवीन्द्रवेणुनिक्वणा यदङ्घ्रिनूपुरस्वना
लसद्रसार्द्रमानसा जयत्यसौ वसुन्धरा॥4॥

विनिस्सरत्ययं ध्वनिर्हिमालयस्य कन्दरात्
जवाहरस्य मत्तवैरिकुञ्जरच्छिदो हरेः।
न हीयतां प्रवीरताऽपचीयतां न धीरता
न भारतीयता कदापि कापथेषु नीयताम्॥5॥

असीमभीमविक्रमक्रमालसन्ति वाहिनी–
धुरन्धराः पुरस्सरा भुशुण्डिकोल्लसत्कराः।
यदीयतुङ्गहुङ्कृतिप्रहारशीर्णविग्रहाः
पतन्ति शत्रुपर्वता जयत्ससौ वसुन्धरा॥6॥

घनान्तरालचारिणी तडिल्लता यथाम्बरे
तथास्ति शक्तिरत्र कापि भारते नरे नरे।
भयान्धकारहारिणी विपक्षपक्षदारिणी
जनप्रमोदकारिणी जयत्ससौ वसुन्धरा॥7॥

अशेषदेशनायकप्रशस्तिपुष्पशालिनी–
ममन्दबुद्धिकल्पनाप्रदीप्तरत्नमालिनीम् ।
समुच्छलद्दयारसप्रसन्नपङ्कजेक्षणां
विशाल सागराम्बरां नमामि तां वसुन्धराम्॥8॥

3. वसन्तविभावरी

उन्निद्रचन्द्रवदना मदनाभितप्ता
शप्ता निलिम्पललनेव भुवं प्रपन्ना।
दुर्दैवतो दयितसङ्गमभङ्गदूना
निःश्वासलुब्धमधुपा मधुयामिनीयम्॥1॥

स्फारानता परभयेन विकीर्य तारा–
हारान् वियन्मरकताङ्गणवेदिकायाम्।
ज्योत्स्नावदातवदना श्वसनानुयाता
या ताम्यदम्बुजमुखी सुमुखी विभाति॥2॥

अत्राप्यसौ मलयभूधरचन्दनाली–
व्यालीकरालगरलोत्कटवैभवेन ।
स्पृष्टा वनावनिचरेण समीरणेन
ग्लानिं प्रयाति नलिनीव करीन्द्ररुग्णा॥3॥

ईषद्विकस्वरमुखं कुमुदं स्पृशन्ती
नीलोत्पलं निजकपोलमुपानयन्ती।
सम्फुल्लपाटलिदलानि परामृशन्ती
धत्ते धृतिं न मधुमासमनस्विनीयम्।।4।।

उत्सङ्गसङ्गतमनोज्ञमिलिन्दवीणा-
क्वाणैः क्षणान् गमयितुं कतिचित् प्रवृत्ता।
दूना पिकालिरुतरीति-वियोगरीति
व्याहारतोऽपि रमते न वनस्थलीषु।।5।।

एनां वियोगदहनासहनां समुद्यत्-
सौन्दर्य-सार-समवाय-निषेव्यमाणाम्।
आलोक्य कम्पविगलत्कुसुमाश्रुधारा
मारादिमा वनलताः सहसोत्सृजन्ति।।6।।

कमलां सुचारुमकरन्दकरम्बिताङ्गी-
मालिङ्गितुं नवसखीमिव सम्मुखीना।
वापीं न याति बहुकण्टकलब्धविघ्ना
निघ्नातिदुर्वहरतीश शरज्वरस्य।।7।।

पुष्पासवं परिनिपीय विलोलवल्ली
दोलासु खेलनकलाकुशला विलोक्य।
रोलम्बवृन्दललनाः कलनादशीलाः
कीलाहतेव हृदि मोहमयं बिभर्ति।।8।।

को वा प्रियतमस्तव मनस्विनि कोऽत्र देशे
किं वाऽप्रियं विहितमत्र च कोऽभ्युपायः।
किञ्चित् प्रपञ्चय वचः परिषिञ्च सद्यः
पीयूषसागरतरङ्गपरम्पराभिः ।।9।।

नो किञ्चिदाह भजते न च मौनमुद्रां
वेणुस्वनेन विरहार्तिमुदीरयन्ती।
नूनं व्यथातिशयलम्बितवक्त्रचन्द्रा
मन्दं प्रयाति मधुमासविलासिनीयम्।।10।।

4. कृष्णमेघः

शम्पा यस्मिन्नकम्पा निवसति जगतां पालने सानुकम्पा
यस्य श्लाघां निलिम्पाः श्रुतिमधुरपदैः साधु सम्पादयन्ति।
पुण्यैः कैश्चिद् विवेकी सरसकवितया जायते यस्य केकी
तृष्णां व्याधूय पुष्णात्वयममृतरसैर्वृष्णिभूः कृष्णमेघः॥1॥

वृन्दारण्योद्भवासु प्रचलदलिकुलस्पर्धिनेत्रोत्पलासु
व्यावल्गद्विभ्रमासु स्मितसितसुमनःसौरभामोदितासु।
तारुण्यश्रीफलासु प्रणयरससुधास्वादनायोत्सुकासु
क्रीडन् कान्तासु तासु प्रमदयतु मनः-काननं कृष्णमेघः॥2॥

5. समस्यापूर्तयः

न भीष्मग्रीष्मोष्मज्वरकवलितं नो घनघटा-
गलद्धाराकारागृहदलितपत्रं क्वचिदपि।
न शीर्णं शीततौं कविमधुकरानन्दसदनं
मधौ दिव्याम्भोजं जयति ननु वाणीविलसितम् ॥1॥

नितान्तं शुद्धान्ते निगडितमभूद्यत् किल पुरा
कदाचित् केषाञ्चित् सरणिमुपयातं श्रवणयोः।
इदानीं स्वातन्त्र्यात्प्रसरति सभागारशिखरे-
ष्वमन्दं नारीणां प्रखरतरवाणीविलसितम् ॥2॥

न वा विद्या ह्रद्या भवति निरवद्या न चरित-
प्रभा सत्यं दूरे क्वचिदपि च मत्या परिहृतम्।
तथाऽपि स्वच्छन्दोच्छलितनयविद्यापरिचयं
युगे यूनामस्मिन् विकलयति वाणीविलसितम् ॥3॥

अविच्छिन्नं तृष्णातरुणगणिकालिङ्गवशात्
पिपासां दुर्वारां धनचयनमात्रे कलयतः।
पुरस्तादारब्धं मधुरतरवाणीविलसितं
फलं किञ्चित्सूते न हसितमहो नापि रुदितम् ॥4॥

नवीने साहित्याध्वनि रसगुणालङ्कृतिकला-
कथाशून्ये स्वैरोल्लसितपदविन्यासचटुलान्।
कपीन्द्रान् पश्यन्त्या नवनवकवीन्द्राकृतिधरान्
गिरां देव्या किञ्चिन्न हसितमहो नापि रुदितम् ॥5॥

इयं वन्ध्या धेनुः सकलजनकल्याणभणिति-
र्नयज्ञानां नाऽस्मन्मसि कुतुकं कन्दलयति।
पुनः प्राप्ते संसद्भवनपदनिर्वाचनविधौ
वशीकुर्याल्लोकान् न हसितमहो नापि रुदितम् ॥6॥

प्रयाते हेमनते श्रयति शिशिरे दूरपदवीं
मधौ लब्धस्पन्दे मदनपदबन्धे श्रुतिगते।
कथं वा नाऽऽयातः प्रिय इति मृगाक्ष्या पथि दृशं
प्रयच्छन्त्या कस्मान्न हसितमहो नापि रुदितम् ॥7॥

अध्यारूढः पदमविरताराधनासाधनाद्यै-
र्गर्वोन्नद्धश्चटुषु पटुभिः पूरितश्रोत्रमार्गः।
द्वारीभूतैर्विनयकुशलैः कार्यहेतोर्वितीर्णं
पत्रं पुष्पं पुरुषतिलकः को विहातुं समर्थः ॥8॥

संन्यस्यापि श्रुतिशतशिरोवाचमुच्चार्य तारं
हारं कण्ठे स्फटिकदृषदां सन्निवेश्यांशुसारम्।
सारङ्गाक्षीकरकिसलयन्यस्तपूजोपहारं
द्वारं सिद्धेरिव यतिपतिः को विहातुं समर्थः॥9॥

व्याख्यातुश्चेत्पदमधिगतं विश्वविद्यालयान्त-
स्तत्प्राप्तव्यं तदधिकमुपाचार्यपीठं परस्तात्।
प्राप्ते तस्मिन् भवति तरसाऽध्यक्षभावाभिलाषः
सिद्धे तस्मिन् कुलपतिपदं को विहातुं समर्थः ॥10॥

रतिनाथ झा

कविरयं 1922 ई० वर्षे अगस्तमासस्य पञ्चदशतारिकायां बस्तीजनपदस्य तलपुरवाग्रामं स्वजनुषाऽलञ्चकार। काश्यां चिरमयमुवास, तत्रैव व्याकरणार्थ-वेदान्तकेशरीसाहित्यरत्न-साहित्याचार्य- एम०ए०-प्रभृतिरीक्षा उदतरत् काशीपण्डितपरिषदा च पण्डितराजोपाधिना सम्मानितः। हिन्दूविश्वविद्यालस्य प्राच्यविद्यासङ्कायेऽयं पुराणविभागस्य आचार्यत्वेनाध्यापयामास। अरविन्दशतकम्, मालवीयप्रशस्तिः, गान्धीशतकम्, महावीराभ्युदयमहाकाव्यम् असङ्ख्यस्फुटरचनाश्चास्य कवित्वशक्तिं प्रथयन्ति। चरमे वयसि कविः उत्तरप्रदेशस्य बस्तीतिस्थाने न्यवसत्।

1. मालवीय-प्रशस्तिः

भाले चन्दनबिन्दुमिन्दुसदृशं कामं समुत्कण्ठितां
कण्ठे शुभ्रतमोत्तरीयकपटेनाश्लिष्य कीर्तिं सिताम्।
अङ्के कञ्चुकमुज्ज्वलं शिरसि चोष्णीषं किरीटोपमं
ध्यायाम्यद्भुतधाम गौरमुदितं श्रेयस्करं प्राणिनाम्॥1॥

किं धर्मो धृतविग्रहः, किमुदितो निर्लाञ्छनश्चन्द्रमाः
सामोदो मलयानिलः सुमनसां किं वा गृहीताकृतिः?
भारत्या यशसां चयः किममलः किं वाग्मितायाः स्मित-
स्पन्दः किं कविरेव नीतिविषये श्रीमालवीयोऽभवत्॥2॥

तातो नो जलधिर्नचापि विषमश्रीः कालकूटोऽग्रजः,
सामोदा न सुरा स्वसा न कमला, नो बान्धवः सिन्धुरः।
नच्छाया मलिना दिने, न रचनीसङ्गो, न बन्धुः स्मरो,
भीतिर्नापि विधुन्तुदात्तदपि सुप्रीतो द्विजो राजते॥3॥

आस्ये यस्य सरस्वती रसवती, बुद्धौ सदा नर्मदा,
कालिन्दी प्रणयामृतेव हृदये, गङ्गा पवित्राशये।

पादान्ते प्रपतन् समुद्रनिवहो, गोदाथ मोदावहा
स्वान्ते, प्रीतिमयी चिराय रमते शिप्रा सिते मानसे॥4॥

धर्मे धन्यसनातने निरुपमां भक्तिं दधानोऽन्वहं
पुण्यां भारतमातरं परवशक्लेशाद् विमोक्तुं रतः।
नित्यं नूतनकल्पनाविलसितोऽप्यास्थावतामग्रणीः
किं किं नाचरति स्म भारतभुवः स्वाधीनताप्राप्तये॥5॥

गङ्गायां स्नपयन् प्रभोरुपदिशन्मन्त्रं पवित्राशयः
सर्वानन्त्यज-जाति-सम्भव-जनानुन्नेतुमौदार्यतः ।
धर्माचार्य-विरुद्ध-दुस्सहवचो-बाणापविद्धोऽप्यलं
कल्याणाद् विरराम नैव दलितव्रातस्य सामाजिकात्॥6॥

साम्रेडं परिमार्दितोऽपि विपदां पद्धिर्न यो म्लायति
श्लाघामेति स एव वीरपुरुषः पुंभिः समभ्यर्चितः।
हेम्नः कान्तिरुदेति तीव्रदहनज्वालासु दाहात् परं
चण्डे चण्डकरे तपत्यपि मरौ वन्द्यं प्रसूनस्मितम्॥7॥

अर्थं नाधिकरोति योऽत्र विपुलं तस्याखिला कामना
स्वान्तं कृन्तति, सन्तनोति नयने ध्वान्तं दिनेऽप्यद्भुतम्।
एषोऽलीयत किन्तु लोकसरणिस्त्वव्युद्यते कर्मणे
सङ्कल्पं सफलीविधातुमिव ते लक्ष्मीः स्वयं नृत्यति॥8॥

वाणी यस्य सुवर्णदर्पदलने लेभे प्रतिष्ठां परा-
मास्यं दास्यमुरीचकार शरदो राकेश्वरेणार्पितम्।
भ्रान्त्वा दिक्षु चिरेण वासभवनं यत्प्राप सा वाग्मिता
वन्दे विश्रुतमालवीयकुलजं तं विश्वसम्मोहनम्॥9॥

धर्मो यस्य परानुरक्तिरतुला भक्ती रमावल्लभे
शक्तिर्व्याप्ततमो निहन्तुमुदयद्विद्यासमुद्वर्धने।
आसक्तिर्निमातृ-भूम्यसुलभ-स्वातन्त्र्य-लक्ष्म्यागमे
स श्रीमान् प्रसरत्प्रभूतमहिमा रेजे चिरं भारते॥10॥

नेतारो निजमातृभूमिचरणे न्यस्तां दृढां शृंखलां
छेत्तुं स्वार्थमपास्य दास्यभवनेहन्तुं हृदा दीक्षिताः।

किन्त्वेषूत्तमनायकेष्वपि भृशं प्रातिस्विकीमर्हतां
बिभ्रत् पूज्यमहामनाः प्रतिदिशं वन्द्योऽभिनन्द्योऽभवत्॥11॥

बुद्ध्या देवगुरुं, नयेन दितिजाचार्यं, सुधामाधुरीं
वाचा, पावनकर्मणा द्विजवरं, धैर्येण शैलेश्वरम्।
गाम्भीर्येण महोदधिं, निरुपमोत्साहश्रिया मारुतं
भास्वन्तं सततादयेन, वपुषा कामं जिगायान्वहम्॥12॥

ब्रह्मर्षेर्भवतः सता मतिमतामग्रेसरात् पावनीं
श्रीमद्भागवतीं कथां मधुमतीं पीत्वा तुतोषामितम्।
भक्तिं चेतसि, वक्षसि प्रगुणिता शक्तिं, विरक्तिं परां
पापात्, सर्वजनेऽनुरक्तिमुदितां गाँधी महात्मान्वभूत्॥13॥

कालिन्दीपुलिने वसन्नपि पिबन् गाङ्गं जलं निर्मलं
संलीनेऽपि सरस्वतीरसमये मज्जन्नलं स्रोतसि।
अङ्के तीर्थपतेर्गृहीतजननः क्रीडन् भृशं कौतुकाद्
वव्रे दिव्यतमप्रकाशजननीं काशीं स्वकर्मस्थलीम्॥14॥

जाड्यध्वान्तसमावृतं हृदधनं दीनं विलीनप्रभं
राष्ट्रं भारतवर्षमेतदतुलं भायात् पुनर्भूतले।
इत्यन्तः परिभावयन्निरुपमं ज्ञानप्रकाशाञ्चितं
सम्यक् स्थापितवानलभ्यमहिमा श्रीविश्वविद्यालयम्॥15॥

वासन्ती प्रियपञ्चमी भरतभूभाग्यस्य वाग्देवता-
प्रादुर्भावमहोत्सवाऽपहरते जाड्यं प्रकृत्यञ्चलात्।
इत्यालोच्य सरस्वतीसमुदयानन्दप्रकर्षोज्ज्वले
संस्थाया निदधे शिलामनुदिनं प्राप्तप्रभूतोदयाम्॥16॥

हस्ते नैकपणोऽपियस्य स महारम्भेषु संरम्भवान्
व्याकर्तुं स्वसमीहितं दिशि दिशि प्रातिष्ठतोत्कण्ठया।
श्रुत्वा तत्परिकल्पनां धनवतां धुर्या वदान्या मुदा
राजानोऽर्पितवैभवाः सफलतामीयुः स्वकोषश्रियः॥17॥

देशप्रेममहाध्वरे समुदिताः सर्वेऽपि सन्दीक्षिता
आचार्यं परिकल्प्य यं सफलतां स्वाधीनतां लेभिरे।

सर्वस्वं हविरत्र मन्त्रविधिना हत्वाऽखिलान् याज्ञिकान्
सिद्धानारचयाञ्चकार स सितां कीर्तिं व्यतानीद् द्विजः॥18॥

साम्राज्ये शिशिरस्य यत्तु विपिने दैन्यं समुज्जृम्भितं
प्रातर्हन्त! हिमाश्रुपातविधिना भूमीरुहो रोदिति।
तत्रैवागमनाद् वसन्तनृपतेर्वल्लीं समानर्तयन्
आमोदं मलयानिलो वितरति प्रीतः पिको गायति॥19॥

भृङ्गो गुञ्जति मौनमुज्झतितरां कूजन् कलं कोकिलो
वल्ली नृत्यति जीर्णशाखिनिवहोऽप्युद्भासते पल्लवैः।
पुष्पाण्यातनुते लतासहचरो भूमीरुहो निर्भरं
सामोदा विपिनस्थली विजयते संप्राप्य सङ्गं मधोः॥20॥

राजन्ते जितहीरका द्युतिभृतस्तारः शरद्यामिनी
श्यामाङ्गावरणाय शुभ्रकुसुमाकारास्तु नीलाम्बरे।
ज्योत्स्ना किन्तु दिवं भुवं च युगपत् संक्षालयन्ती सुधा
पूर्णेन्दोः प्रथते महोर्मिरिव सा क्षीराम्बुधेर्द्योतते॥21॥

त्यक्त्वा सप्तवितस्तिकायमविशद् यो विश्वविद्यालयं
स्वप्राणैः प्रगुणीकरोत्यनुदिनं प्रोत्कर्षयन् वैभवम्।
आचार्यानधिकारिणो मतिमतो मान्याँश्च विद्यार्थिनः
सेवासद्व्रतशालिनोऽपि स निजाचारेऽभिषिञ्चत्यलम्॥22॥

ध्वान्तध्वंसपटुः प्रसुप्तनयानन्निद्रां तु विद्रावयन्
आमोदं जनमानसाम्बुजवने प्रोल्लासयन् निर्भरम्।
सर्वत्र प्रसरत्सुवर्णकिरणान् विस्तारयन्नोजसा
नव्यः कोऽपि सहस्रदीधितिरयं प्रादुर्बभूवावनौ॥23॥

आकर्षतीव पुरुषोत्तमचारुचित्तं
पुण्यात्मनां मनसि कौतुकमातनोति।
नेत्रेऽञ्जतीव जे गतोऽञ्जनमञ्जुरेखां
लोकार्चिता मदनमोहनकीर्तिलक्ष्मीः॥24॥

सारं समुन्नयति सान्द्रतमोऽपहन्तृ
सारस्वतं किमपि धाम वसुन्धरायाम्।
अङ्गश्रियापि सुषमामसमां सृजन्ती
मोहं हृदो हरति यत् प्रसभं जनानाम्॥25॥

क्षीराम्बुधेरपि तरङ्गविलासभङ्गीं
ज्योत्स्नां शरद्युपचितामपि शीतरश्मेः।
कान्तिं मरालवपुषोऽप्यमलां जयन्ती
जागर्त्यहो! मदनमोहनकीर्तिलक्ष्मीः॥26॥

अस्मिन् प्रिये परिसरे मदनात्मना त्वं
व्याप्नोसि दर्शकमनो मदयन्नितान्तम्।
मोहं भृशं सुमनसामपि सन्दधान-
स्त्वं मोहनेन वपुषापि विभासि शश्वत्॥27॥

धामाद्भुतं जयति वागधिदेवतायाः
शृङ्गारकल्पमिव शिल्पकलाङ्गलक्ष्म्याः।
यत्सेवने सुमनसो मनसोऽप्यगम्या-
मासादयन्ति मुदितामुदितां स्वचित्ते॥28॥

धन्यं त्वया कुलमिदं निरमायि वाचो-
देव्या विलासभवनं भुवनाभिरामम्।
यत् सेवितुं ग्रहगणोऽपि नवाभियोगैः
किं किं न कल्पयति कौशलमात्मशक्तेः?॥29॥

कार्तस्वरांशुकमपाहरते दिनेशः
सर्वाः कलाः कलयतीव कलाधरोऽपि।
अङ्गारकोऽप्युपनयत्यतुलं प्रताप-
मङ्गारकल्पमिह विस्मयहेतुभूतम्॥30॥

सर्वत्र सञ्चरति किं न बुधो धुरीणो?
वाचस्पतिर्न किमुदञ्चति मञ्जुलीलः?
गायत्यजस्रमिह सत्कविरस्य गीतं
मन्दोऽप्यमन्दमुदमर्पयतीव शश्वत्॥31॥

आरामरम्यकमलां तरुवल्लरीणां
श्यामत्विषोपचरतीव विधुन्तुदोऽपि।
केतुस्तु नृत्यतितरामनिशं पुरस्ताद्
वाग्देवताललितमन्दिरगोपुरस्य ॥32॥

कस्तूरिकातिलक एष मनुष्यतायाः
सौभाग्यमङ्गलमणिर्गुणिनां सुकीर्त्तेः।
कर्मण्यताहृदयवल्लभरत्नहारः
सारः परः सुमनसां जयतीह धन्यः॥33॥

ज्योत्स्नाङ्कुरो विजयते द्विजराजताया:
स्तन्यत्रपाकवच एव च मातृभूमेः।
वाग्वीरुधः सलिलसम्भृतमालवालं
कल्याणकल्पतरुरेव महाविभूतिः॥34॥

सारस्वते महिमशालिनि मन्दिरेऽस्मिन्
उद्दामशक्तिनिलये त्वयि चास्त्यभेदः।
इत्याकलय्य विनतोऽन्यतरस्य पूजां
कुर्वन् द्वयोरवचितिं मनुते मनीषी॥35॥

हित्वा भवान् भुवनमोहनमद्वितीयं
स्वर्णप्रभं स्फुरितसप्तवितस्तिकायम्।
एवं ततोऽपि रमणीयतरं स्वविश्व-
विद्यालयाख्यवपुरुद्वहते विशालम्॥36॥

किं ब्रह्मलोक इह भूतल आगतोऽस्ति?
किं वा विधेर्निपुणतैव दधार देहम्?
वाचस्पतेः किममला कमलाऽवतीर्णा?
पूर्णावनेः सुकृतराशिफलं किमेतत्?॥37॥

ज्योतिश्चिरन्तनमपास्तरजोविकारं
रत्नद्युतिप्रतिममुज्झितवातभीति ।
सान्द्रान्धकारहरणे जितभानुदीप्ति
सारस्वतं जयति धाम मनोऽभिरामम्॥38॥

गाढं तमो हरति, नित्यमुदेति, सर्वान्,
सुप्तान् प्रबोधयति, नन्दयति द्विजाब्जम्।
रात्रावपि स्फुरति, निर्जितराहुकेतु
राभासतेऽयमिह कोऽपि रविर्नवीनः॥ 39॥

स तीर्थराजो जननेन पूतः
सूतो द्वितीयोऽप्यथ तीर्थराजः।
यत्र स्फुरज्ज्ञान-कलाक्रियाणां
निःष्यन्दते कापि नवा त्रिवेणी॥40॥

एषा नवीना प्रतिभाति संवित्
तरङ्गमालोल्लसितेव गङ्गा।
हंसावलिर्यत्पुलिने स्वनन्ती
सन्तिष्ठते मानसमुक्तरागा॥41॥

परस्परस्नेहसुधां स्रवन्ती
कलिन्दकन्येह कलाविलासा।
स्रोतो यदीयं विवुधान्तरङ्गे
प्रसादभङ्गीं जनयत्यजस्रम्॥42॥

सरस्वती यत्र परःसहस्र-
धाराभिरङ्गीकृतदृश्यरूपा ।
निःष्यन्दते सद्द्विजसेव्यकूला
लसद्दुकूला ललनेव रम्या॥43॥

यस्याकृतिह्रपयतीव लक्ष्मीं
धृतावलेपां त्रिदशालयस्य।
प्रवर्तते यत्र सदा प्रकृत्या
ज्ञान-क्रिया-सन्ततिसप्ततन्तुः॥44॥

अन्विष्य लोकोत्तरकान्तिभाजः
सुधीन्द्रमौलेर्मुकुटान्मणीशान् ।
विन्यस्य चैतस्य कुलस्य शोभा
त्वया समृद्धिं गमिताऽद्वितीयाम्॥45॥

विना स्वधर्माचरणेन विद्या
ह्यद्यापि नाविष्कुरुते चरित्रम्।
इत्येतयोः सङ्गमपुण्यभूमिः
परिष्कृतेयं भवताऽवता शम्।।46।।

येनाद्वितीयेन कुलेन देश-
भक्त्योन्नतो नायकरत्नराशिः।
समर्प्यते राष्ट्रसमृद्धिहेतुः
केतुः स्फुरन् नृत्यतु तस्य शश्वत्।।47।।

विद्वज्जनाभ्यर्चितकीर्तिरेखा
'प्रज्ञा' कुलोत्कर्षमुपाहरन्ती।
प्राच्यप्रतीच्यो भयतत्त्वसारं
कवीन्द्रवाचं च पुरस्करोतु।।48।।

सद्वृत्तबोधकिरणं नररत्नजात-
मुत्पादयन् सुचरिताकर एष दिव्यः।
आचन्द्रतारकमुदित्वरकीर्तिलक्ष्म्या
संसेवितोऽवति जगन्निजवैभवेन।।49।।

2. सुभाषितानिः

भ्रातर्नाविक! दुस्तरामतितरां कल्लोलिनीं लङ्घितुं
श्लाघ्यानेव जनान् सतामभिमतान्नावि त्वमारोहयेः।
चेदेकोऽपि दुरन्तपातककुलानुष्ठाननिष्ठो जनो
दैवादत्र समैति हन्त सुजनैः सार्धं तरिं मज्जयेत्।।1।।

माकन्द! त्वमुदारतामिव महाशाखां विशालां श्रयन्
दिग्भ्योऽभ्येत्य खगः परस्परमतिप्रेमाङ्कुरं वर्धयन्
कीर्तिं ते सकलासु दिक्षु वितरंस्त्वत्कोटरस्थायिना
सर्पेण प्रतिहन्यते यदि ततः कीदृग् यशस्ते भवेत्।।2।।

उत्फुल्लैः कमलैर्मरन्दमुदिरैर्गुञ्जद्भिरेवालिभि-
र्हंसैः सारसमण्डलैर्मुखरितैः सच्चक्रवाकैर्द्विजैः।

लक्ष्मीं कामपि बिभ्रदुज्ज्वलजलं रम्यं समृद्धं सरो
दुर्भाग्यायतनं करोति नितरामेकोऽपि भेको वसन्॥3॥

नीचाः सन्ति सहस्रशोऽधिभुवनं किन्तु क्षमाक्षामता
हेतुः श्येन! भवादृशो न विदितो बन्धून् मुधा मारयन्।
नो रक्तासव पानपीनपरमोत्कण्ठा न मांसाशन–
प्रीतिस्फीतरुचिश्च तेऽस्ति तदपि क्षीणान् निहंसि द्विजान्॥4॥

स्तम्भे निःसारतैवानिलमिलनवशाद्, दीयते ते सुपत्रं
वन्ध्यत्वं जीवनस्य प्रकटयति फलोत्पत्तिराद्यैव सद्यः।
नो छाया नापि शाखा न खलु सुमनसः सौरभं लोभनीयं
रम्भे, किं गर्वगन्धं भजसि निजमनस्याशु नश्यद्विभूत्या॥5॥

कीर्त्तिः का तव का च सिद्धिरतुला विश्वस्य सम्प्रीणने
काये का सुषमा सुदुर्लभतरा का लोककाम्या स्थितिः।
लक्ष्मीः का, वनदेवतास्तुतपदा का माधवाराधिता
शोभा तेऽस्ति पिकेति पृच्छति मुहुः काकाध्वनिर्वायसः॥6॥

सच्छायद्रुमकृन्तनाय परशुर्दग्धोऽपि वैश्वानरे
भूयश्चायसपिण्डताडनसहस्तीक्ष्णो भवन् भ्राजताम्।
तावन्नैव भयं ततो न लभते यावत्स तक्ष्णः करं
दुष्टः किन्तु परोकारकारकरणे ह्येकोऽप्यनीकायते॥7॥

ये स्वार्थप्रतिपत्तये प्रतिपलं नव्यानभव्यानपि
प्रह्वीभूय महाप्रभूननुनयन्त्युच्चावचैः कर्मभिः।
निन्द्यास्तेऽपि परन्तु हन्त सुजनोत्कर्षासहिष्णुः खलो
व्यर्थं सर्वहितक्षयाय विचरन् गर्हास्पदं जीवति॥8॥

प्रीतिर्यास्तु परानुरक्तहृदये दाक्ष्यानभिज्ञाप्रभो-
र्मासेवावसरो ऽस्तु दैन्यविनतिर्नैवास्त्वदानतुः पुरः।
श्रद्धा दम्भिनि मास्तु मास्त्वरसिके काव्यामृतप्रापणं
वैमुख्यं परमेश्वरान्न भवतु ब्रह्मन्निति प्रार्थये॥9॥

वन्यं स्वादुतृणं न लभ्यमधुना ग्रासो न घासस्यते
प्राप्यं नैव कडङ्गरं न सुरभे पेयं जलं शीतलम्।
नो पूजा, न समादरो न परमा सेवा, न रक्षाव्रतं
चित्ते नैव विचिन्त्यतां शुनि यतो रक्तः प्रभुः साम्प्रतम्॥10॥

3. चन्द्रः प्रवालप्रभः

मन्दारद्रुममञ्जरीविरचितस्रग्दामभिर्मण्डिते
सामोदे मणिदीपपीततिमिरे श्रीधाम्नि केलीगृहे।
शम्भोर्मन्मथमेदुराध्वरसमारम्भेऽभवत् पार्वती-
पादालक्तकलिप्तगात्रविभवश्चन्द्रः प्रवालप्रभः॥1॥

सिन्दूरैरनुलेपिते तिलकिते काश्मीरजैः कुङ्कुमैः
माल्यैर्मञ्जुजपाप्रसूनरचितै रक्तोत्पलैरर्चिते।
शोणक्षौमविनिर्मिताम्बरवृते भक्तानुरक्ते परे
देवे श्रीमति ऋद्धिसिद्धिरमणे चन्द्रः प्रवालप्रभः॥2॥

दग्ध्वा व्योमवसुन्धराङ्गसुषमां हृत्वेन्दुताराश्रियं
पीत्वा हन्त कुमुद्वतीप्रमुदितामस्तङ्गते भास्करे।
नृत्यन्त्याः क्षितिजेऽथ गीतरसिकानालापयन्त्या द्विजान्
सन्ध्याया नवसङ्गमात् समुदितश्चन्द्रः प्रवालप्रभः॥3॥

अन्यालिङ्गनलक्ष्म वक्षसि किमप्यालक्ष्य दन्तच्छदे
लग्नं कज्जलमाकलय्य विरसं वीक्ष्य प्रियस्यान्तरम्।
जातेऽलक्तकलोहिते सुनयने गण्डे च रक्तोत्पले
मानिन्याः समभून्मृणालधवलश्चन्द्रः प्रवालप्रभः॥4॥

स्निग्धं बन्धुजनं प्रसादमधुरः प्रह्लादनो मादनः
पूर्वं यः स्मितचन्द्रिकामृतझरैरानन्दयन् राजते।
सोऽयं सागसि वल्लभे मृगदृशः शोणद्युतेरुद्गमात्
सञ्जातो नवनीतनिर्मलरुचिश्चन्द्रः प्रवालप्रभः॥5॥

शुक्ले शुक्लयशोऽवतंसितजगज्जाले प्रतापानलो-
द्भासा भास्वरकेसरद्युतिमयो जातः प्रपञ्चोऽधुना।

सर्वेषामनुरञ्जितं सुमनसामन्तर्निसर्गोज्ज्वलं
शम्भोर्भाललिविभूषणं च समभूच्चन्द्रः प्रवालप्रभः।।6॥

4. सद्यः फलोर्पणपरेव शरन्नितान्तम्

अद्दामयौवनविवर्धितकाममाया –
जायां पयोधिनृपतेरपि कान्तिहीनाम्।
मर्यादया विरहितामहितां प्रजानां
सद्यो नियन्त्रयति धान्यशयन्नितान्तम्।।1॥

वर्षासु हर्षभरनिर्भरजातवेगा–
मुन्नादिनीमिव विलेपितागाढपङ्काम्।
कूलङ्कषामपि नियम्य विनिर्मलाङ्गी
गाङ्गीं श्रियं वितनुतेऽद्य शरन्नितान्तम्।।2॥

सान्द्राम्बुदोन्नतघटावृतमित्रवृतं
ज्ञात्वा मरालकुललोपमिलाङ्गणाच्च।
श्यामं घनं द्रुतमतो विनिहन्तुकामा
सज्जीकरीति धनुरद्य शरन्नितान्तम्।।3॥

वर्षातपाद्यसहदुःखशतानि मूर्ध्ना
धृत्वा कृषीवलकुलं कृषिकर्मसक्तम्।
धान्यैः समेधयति सम्प्रति शारदीयैः
सद्यः फलार्पणपरेव शरन्नितान्तम्।।4॥

पद्मप्रसूनमकरन्दकरम्बितश्रीः
शेफालिकाकुसुमसौरभसम्भृतापि ।
भानुं दिवा कुमुदबान्धवमप्यमन्दं
रात्रौ प्रसादयति किन्न शरन्नितान्तम्।।5॥

सन्तर्पयत्यथ पितॄनथं चाम्बिकायाः
पूजोत्सवं वितनुते जनहर्षहेतुम्।
लक्ष्मीं समर्चयति दीपकमालिकाभि–
रामोदयत्यथ नरं च शरन्नितान्तम्।।6॥

5. समस्यापूर्त्तयः

अपि प्राज्यं राज्यं तृणमिव परित्यज्य सहसा
स्वधर्मानुष्ठानैर्जननमनयन्नर्चिततरम् ।
इदानीं तत्रैवाभ्युदयमधिगन्तुं नयविदां
चरित्रैरस्माकं न हसितमहो नापि रुदितम् ॥1॥

प्रवृत्ते दुर्वृत्ते दुरितरतचित्ते युवजने
निरातङ्कं नृत्यत्यविनयमये दस्युनिवहे।
परोत्पीडाक्रीडास्वखिलभुवि दीप्तासु सततं
धृतेः शान्तेर्गीतोच्छ्वसितमिह वाणीविलसितम् ॥2॥

तमस्तोमे लीनं शुचिरुचिविहीनं हतनयं
महादीनं गर्वाङ्कुरनिचितचित्तं कुवचनम्।
परिष्कर्तुं स्वान्तं मलिनमनसामद्य पठतां
गुरूणां निस्तन्द्रं प्रभवति न वाणीविलसितम् ॥3॥

कदर्येष्वौदार्यं, रणशिरसि संहारपटुता-
मतीव त्रस्तेषु प्रथितमहिमानं जडधियाम्।
विनीतत्वं दर्पोद्धतहृदयभाजामनुपमं
कवीन्द्राणां सूते मधु मधुरवाणीविलसितम् ॥4॥

जनाक्रोशे व्याप्ते विलयमुपयातेऽथ नियमे
प्रवृद्धे सङ्घर्षे स्वपिति जनहर्षे प्रतिदिशम्।
महार्घत्वे घोरे जनमनसि कामं कलुषिते
नयज्ञानां घोषो विफलमिह वाणीविलसितम् ॥5॥

सुसम्पन्ने राष्ट्रे रचयति नवीनास्त्रनिचये
महिम्नः सम्भूत्यै धनजनसमाकर्षणपरे।
कृते सैन्योत्कर्षे प्रशमपरिचर्यानयविदा-
मिदानीं संसारे लसति शमवाणीविलसितम् ॥6॥

विजेतुं सद्द्राक्षां मधुमधुरिमाणं तिरयितुं
प्रपञ्चे तन्त्रीणामधरयितुमुल्लासलसितम्।
परीरम्भं रम्भाकृतमपि सदम्भं क्षपयितुं
विदग्धोऽसन्दिग्धो नमति कविवाणीविलसितम् ॥7॥

अवस्थी बच्चूलालः

ज्ञानोपाह्वः अवस्थी बच्चूलालः 1918 ई. वर्षे अगस्तमासस्याष्टमे दिने भुवमवततार। साहित्य-व्याकरणाचार्यत्वेन दर्शन-व्याकरणशास्त्रित्वेन प्रथमश्रेण्यामलङ्कृतोऽयं संस्कृतविद्यालयेषु पञ्चवर्षाण्यध्यायपामास। 1949 ई. वर्षात् 1967 ई. वर्षं यावत् महाविद्यालयसेवायां हिन्दीप्राध्यापक-पदमलञ्चकार। हिन्दीसंस्कृताभ्याम् 'एम.ए.' इत्युपाधिद्वयमपि सम्प्राप्य 1963 ई. पी. एच. डीत्युपाधिं 1975 ई. तमे चाब्दे डी. लिट्-पदवीं महताध्यवसायेन पाण्डित्येन चावाप। विंशतिप्रायः शोधच्छात्रा अस्य निर्देशे पी.एच.डी. इत्युपाधिमधिगतवन्तः। कैशोर्यादेव काव्यरचनायां रुचिमसौ प्रकटीचकार। प्रकाशितेषु ग्रन्थेषु "काव्य मे रहस्यवाद", 'ध्वनिसिद्धान्त तथा तुलनीय साहित्यचिन्तन', 'भारतीय काव्यसमीक्षा में ध्वनिसिद्धान्त' इत्यादयो गवेषणापूर्णाः प्रबन्धाः अप्रकाशितेषु च 'हिन्दीव्युत्पत्तिकोशः', 'तुलसीकोशः' दशसहस्रपृष्ठात्मकश्च 'भारतीयदर्शनाास्त्रबृहत्कोशो' ऽस्यागाधाप्रतिमपाण्डित्यपाथोनिधेर्मानदण्डाः। 'अर्वाचीनसंस्कृतसाहित्यम्', 'सृस्कृतप्रतिभा' दूर्वा चेत्यादिपत्रिकासु संस्कृतकाव्यान्यस्य प्रकाशितानि। प्रतानिनीति काव्यसङ्ग्रहोऽस्य साहित्याकादेमीपुरस्कारेण सम्मानितः। योषासप्ततिरिति खण्डकाव्यमप्यस्य कवित्वपराकाष्ठां प्रमाणयति। अयं कालिदासाकादम्यामुज्जयिनीस्थायामधिष्ठातृपदे कार्यमपि कृतवान्। उज्जयिन्यामेव निवसन् 4.03.2005 दिनाङ्के प्रहाप्रयाणमकरोत्।

1. शुकवृत्तम्

विक्रीतकः क्वचन कश्चन पोष्यमाणः
क्षीरं पिबन्नपि च जातु न जाततोषः।
कारां चिकर्तिषुरथो यतमानचञ्चुः
स्वस्मिन् स्वयं प्रणिहितः शुक इत्युवाच॥1॥

उक्तेन येन मुनयः किल मुक्तिमापु-
स्तद् रामनाम रसना मम रारटीति।
एकापि किन्तु जटितेयमयःशलाका
शैथिल्यमेति न मनागपि पञ्जरस्य॥2॥

बन्धाय संयतमना इव दोद्मुहीमि
द्रुह्यंश्च नाम विमना इव दोदुहीमि।
तेनैव भोजनमवाप्यत इत्यपेक्षं
सर्वं तपः परकृते परवान् करोमि॥3॥

व्याधेन कायपरवत्त्वमिह प्रणीतं
वाक्पारतन्त्र्यमपि सम्प्रति पालकेन।
यस्मिन् द्वितीयमथ तस्य मनोऽन्यदीयं
स्वीयं किमस्ति हरये यदुपाहरामि॥4॥

आत्मा स्वतन्त्र इति चेन्निगमा निराहु-
र्नाथस्य तस्य यदि नास्ति च नाथवत्ता।
विश्वस्त एव भव जीव मदीय तावत्
कारास्वपीह भगवानवतर्तरीति॥5॥

इत्थं विचिन्तयत एव च कोऽपि बालो
लीलापरायणमनाः परिकूर्दमानः
तत्पञ्जरं प्रति शनैः सहसोपयातो
द्वारं विपाट्य विजहास सपाणितालम्॥6॥

उड्डीय पञ्जरमपास्य स एव कीरः
खेलंश्च खे पुनरुपेत्य रसालशाखाम्।
चाकाश्यमानमहिमानमितः सुपर्णं
स्वादूनि मङ्गलमना बुभुजे फलानि॥7॥

त्रोट्या विमृज्य तनुमप्यपनीतकिट्टः
पक्षौ प्रसार्य सुमनास्तरसा तपस्वी।
व्योमन्यसीमनि गतोऽनुगतः सखायं
स्वीयं स्वभावमभिगम्य समुत्पात॥8॥

2. नेतृ-स्तवः

दिल्ली-वल्लभ-पाणि-पल्लवे-तले विश्रम्य पाटच्चरा-
श्चीराणि प्रसभं हरिन्त वनिता-वर्गस्य दुःशासनाः।
स्वेच्छाचारपरा यभन्ति रभसादालिङ्ग्य वाराङ्गना
दुःशीलाः परिशीलयन्ति विविधान् भोगानिमे भोगिनः॥1॥

नेता कण्टकशोधनाय यतते स्वस्यैव मार्गस्य यत्
तस्मात् कण्टक-जालमेव विकिरत्यालोकतन्त्राध्वनः।
लोकोऽयं क्षतजाप्लुताङ्घ्रिरधुना कार्पण्यभृद् दूयते
नेता रोदिति नक्र-बाष्प-विकलं तत्पीडया पीडितः॥2॥

भूरि भ्राम्यति, चङ्क्रमीति चकितं, चङ्क्रम्यमानः क्रुधा
प्रायो निष्करुणं निभाल्य वसुधां जङ्घन्ति पादाहतैः।
ओष्ठौ संसदि दन्दशीति दशनैर्लेलिह्यते जिह्वया
नेता नाट्यरसावतारनिपुणः किं किं न लालप्यते॥3॥

अद्यैव प्रथयामि दीनभवनेष्वाविष्कृताङ्गीं रमां
सम्प्रत्येव समत्व-सौहृद-सुधा-स्वर्दीर्घिकां खानये।
एतस्मिन् क्षण एव जीर्ण-जटिलां जातिप्रथां चूर्णये
हन्तैव प्रलपन्ति मञ्चकगता मत्ता मतादित्सया॥4॥

कस्त्वं भोः, कथयामि दैवहतकं मां ब्रूहि नेतृ-ब्रुवं,
वैराग्यादिव वक्षि, साधु विदितं, कस्माद्, यतः श्रूयताम्।
वामाऽऽपात-निपातनैक-निपुणा वामैः पुनः पुज्यते
नच्छायापि विषह्यते मम सदा लोकोपकारार्थिनः॥5॥

सद्यो लोक-हित-व्रतं विवृणुते स्वार्थैकसज्जोऽपि सन्
नित्यं नास्तिक एव दैव-दलितो दैवज्ञमालम्बते।
उद्योगाधिपतीन् कुतर्क-कितवः सन्तर्पयत्येकतो
नेता चापरतो दरिद्र-जनतोत्थानाय संनह्यते॥6॥

आगच्छेत् स समाजवाद-विभवो यस्य प्रसादात् परं
स्वच्छन्दं विहरन्तु रन्तुमनसः स्वैराधिकाराः स्त्रियः।
इत्थं कूट-कथंकथः प्रवचनैर्मिथ्यावदानक्षमो
नेता मल्लनटोऽक्षवाटमटति द्वन्द्वाय च व्यूहते॥7॥

कामोत्ताप-विदग्ध एव समलं कापल्वलं गाहते
तर्तुं मोह-महार्णवं बहुमदो लोभेन संवाहते।
कोपाविष्टमनाः क्षुणत्ति धरणीं प्रस्कुन्दमानो रज-
श्चण्ड(चण्डीं)पश्यति फूत्करोति निबिडं नेता महासैरिभः॥8॥

लाला-लिप्त-मुखोऽवलिप्त-नयनः श्मश्रूत्कटः कौटिको
यक्षो हन्ति विसार्य बाहु-युगलं गर्जन् विपक्षं प्रति।
रोषं पोषमुपानयन् कृत-जयोद्घोषं समुज्जृम्भते
नेता भ्रूकुटि-कुण्ठको घटयते शार्दूल-विक्रीडितम्॥9॥

काणः कश्चन सर्वतन्त्रमवनौ निश्चक्षुषामीहते
क्लीवः कोऽप्यथ चञ्चु-चापल-जुषां स्वराज्यमासज्जते।
दस्यून् दुर्गतकान् विचिन्त्य दयते कश्चित् पुनर्वासको
हा हा सज्जन-रञ्जने कृतमतिर्दृष्टो न कोऽपीश्वरः॥10॥

3. दस्युशुनकीयम्

दस्युः श्वा कश्चिदासीदनवनतशिराः पुच्छसंचालनाज्ञः
सन्दृप्तः पीवरस्फिग् दरचलनयनो नित्यसन्नद्धसत्त्वः,
एकैकान्[1] विश्वकद्रूनवगणयति वा कृत्तकायानुताहो
कुर्वाणो जातिवैरी विचरति चरणैः क्षोदयन् भूमिभागान्॥1॥

ग्रामे श्वानः कदाचित् कुलबलविपुला बद्धसंघा अधावन्
बुक्काभिर्दृश्यदन्तैरपि भयजननं तस्य कर्तुं प्रवृत्ताः,
विष्वग् रुद्धस्तदानीं कुतुकमिव दधत् तत्र वाचंयमोऽसा-
वेकस्मिन्मूत्रयित्वा[2] परमथ बलिनं कीटमर्दं ममर्द॥2॥

तस्माद् भीता अजादा अजहरणपरा जातु नैव क्षमेर-
न्नाच्छिद्याजार्भकान् स .स्वयमुदरदरीं पूरयेन्निर्विशङ्कः,
आतङ्कात् तस्य बाला द्रुतगतिशरणां दूरतस्तर्कयन्ति
ग्राम्योऽसौ, नैव वन्यः, क इव ननु भवेत् कुक्कुरः सोऽपि दस्युः॥3॥

तूत्कारैर्ग्रासदानं विरहयति सदा, तुच्छता मानवानां
काष्ठां यातेति मत्वा, प्रकृतिविमुखता चाटुकारारवेषु,
उल्लङ्घ्य प्रांशुभित्तिं प्रधन[3]-निपुणया मुद्रया घुर्घुराभिः
सर्वं भक्ष्यं गृहीत्वा सपदि स च पुनः कूर्दया सम्परैति॥4॥

कृत्यां[4] दैनन्दिनीं स्वां निरवहत पटुर्निर्भयो निर्व्यपेक्षः
स्वेच्छाधीनोऽप्यदीनो विचरति तरसा गेहतो गेहमेकः,
यावन्नो जाठराग्निं शमयति रभसा तापवदाहिण्डमानः

शृण्वन् कोलाहलानां स्वपिति च रहसि क्वापि धौतक्षुदंहाः[5]॥5॥

स्तेयं कर्तुं न जातु प्रभव इति समे तस्करास्तीक्ष्णदंष्ट्रं
दत्तादानानपेक्षं प्रतिभयनखरं प्रत्यतन्वन्नसूयाम्,
ग्रामे तस्मिंश्च तस्माद् भयमुपनमिताः शष्कुलीसक्तुदस्योः
पान्था दूरेण कूपान् विजहति चपलैरक्षिभिर्गूरयन्तः॥6॥

मध्यग्रामं कदाचिन्नियति-विरचितोऽथ प्रमाथो[6] विजज्ञे[7]
दस्यूनां मानवानां धनिगृहमभितः सैन्यमाक्रम्य तस्थौ,
ते लुण्टित्वा हिरण्यं तदनु च हतका भूषणानां गृहिण्या
आच्छेदाय प्रवृत्ता "न खलु न खलु" सा तारस्वरं रुराव॥7॥

श्रुत्वा तस्या विलापं श्रवणयुगमुदाघूर्णयन् सारमेयः
कूदित्वा तार्णतल्पादनवगतगतिः सोऽथ सर्वाङ्गकृष्णः,
दस्यूनां दस्युरेव प्रकटितमहिमा भैरवाकार आरात्
प्लावं प्लावं प्रविष्टः समरमरचयत् तेषु दुर्योधनेषु॥8॥

चक्रव्यूहे यथैव प्रतिभटविकटे युध्यमानः समन्ता-
देकस्तत्राभिमन्युर्निहतरिपुगणः सप्तमव्यूहमध्ये,
उच्छल्योच्छल्य धावन् कुहकमिव रणे स्पर्धमानो वितेने
तद्वद् घातान् सहिष्णुर्दिशि दिश सरमावंशसारो जजृम्भे॥9॥

एकाक्षः कोऽपि कोऽपि त्वचि परिदलितः कश्चनोत्कृतकर्णः
कश्चिद् दन्तैश्च तीक्ष्णैरजनि निरधरः कोऽपि खञ्जत्वमीतः,
यातप्राया त्रियामेत्यपहतमनसः प्लायितास्ते निरर्थाः
कश्चित् तत्रान्तराले सपदि बत शुनस्तस्य चिच्छेद शीर्षम्॥10॥

यावज्जीवं[8] विदग्धः स्ववशविहरणः सिंहजीवं जिजीव
प्राप्ते काले निजेच्छाभ्युपगतमरणो भीष्ममारं ममार,
ग्रामे प्रापूजि तस्य प्रतिकृतिरनिशं ग्रामदेवप्रपूजं
गेहे गेहे सुकीर्तिर्हुतवहसुरभिप्राणसारं ससार॥11॥

4. मातुः स्तवकः

पतिप्राणे मातः क इव महिमानं तव नुयात्
पतिं स्वान्तःसारैः सह चिदणूनाशेन[9] बिभृषे,

नवीकर्तुं कार्तस्वरमिव शरीरं प्रकुरुषे
परिष्कर्तुं कर्तुं जगति कृतकृत्यं विनयसे॥1॥

निकायो धातूनां मसृणमसृणः पुत्रपदवीं
दधानो दम्पत्योः प्रणयनिलये कूजनपिकः,
व्यलीकव्यावृत्तो[9] हृदयविभवः संभृतरसः
कुटुम्बप्रस्तारो[10] नलिननिकुरुम्बो द्युसरितः॥2॥

स्मितं किंचित् साचि[11] स्फुरदधरयोः कोणकलितं
विधाय भ्रूभङ्गं नयनयुगलीचालनपटुः,
तव स्तन्यं धातुं कृतकरुदितं यत् स तनुते
स विस्रम्भस्तम्भो[12] भवति जननि त्वय्यकृतकः॥3॥

धमन् धायं धायं करविधृत-पीयूषकुतुपौ[13]
प्रमीलाधीनः[14] सन् निभृतवदनोऽसौ जपति यत्,
समाश्वस्तो वक्षस्तव समुपधाय[15] स्वपिति यत्
स आनन्दाभोगो भगवति सुराणामसुलभः॥4॥

निलिम्पा[16] लिम्पन्तु प्रसभमभिकाश्चन्दनघनं
सुरीणां स्वर्णद्यां निधुवनधुवित्रं[17] विधुवतु,
सुराधानी गन्धैर्मदयतु मुहुर्नन्दनवनं
यदम्बाया अङ्गः प्रथयति सुखं तद् दिवि[18] कुतः॥5॥

मुद्रा सध्रीचीना[19] तरलसरला पालिविषये
प्रयोगे नीचीना निरुपधि विषूचीनखचना,
अपीचीन-स्नेहा विरचित-पराचीन-वलया
प्रतीचीनाम्बायाः सुतवदनचुम्बा विजयते॥6॥

प्रविष्टः सप्तत्यां[20] जयति रसनिष्पत्तिनिपुणः
प्रवीणो वादेषु भ्रदयति[21] मुनीनामपि मनः,
जराजीर्यन्मूर्तिर्जरयति भयं यद् भवकृतं
रसज्ञायां लग्नः स तव भवति स्तन्यमहिमा॥7॥

हिमतौऽ सप्तार्चि प्रतपति तपे त्वं हिमरुचि-
स्त्वमौशीरी कुम्बा[22] वहति दहनोष्णेऽपि पवने,

विपत्तौ सम्पत्तिः स्मरणविषयीभूय महसा
सुताय त्वं मातः सकलमनुकूलं कलयसि॥8॥

रसस्त्वं त्वं रक्तं पिशितमथ मेदोऽस्थि च शिरा
धमन्यो मज्जा त्वं बलमपि मनश्चेन्द्रियगणः,
अमीषां संघातश्चिदवकलितः षोडशकलो[23]
न तत् किंचिज्जन्तौ जननि घटते यन्न भवसि॥8॥

अभावानां[24] भावस्तव सति तिरोभाववचनः
स तेऽम्ब प्रत्यानां [25]प्रतनु-तनुधारासु नियतः,
अभिव्यक्तिं या च प्रसव इति गायन्ति कवयो
निमित्तानां भावे व भवति भावो भव[26] इति॥10॥

उपादाने मूले त्वपि जगदिदं जन्म लभते
त्वयि स्थित्वा काले त्वयि विलयमेति प्रतिलयात्,[27]
त्रिदेवप्रख्यानं यदुपलभते शक्तिशबलं
तदद्वैतं मात्रीभवति महितं तत्त्वमृतम्॥11॥

विरिञ्चिवैराजं रचयतु विवर्तेन भुवनं
चतुर्बाहुर्बाढं वृढयतु दृढं पोषयतु तत्,
क्षणात् संवर्तेन[28] त्रिपुरमथनः संहरतु च
त्रयः क्रोडाक्रीडे[29] तव जननि चेक्रीडपृथुकाः॥12॥

जगत् पिण्डीभूतं शिशुरिति यतः सूतिमयते
पितॄणां साहस्त्री[30] भवति खलु यद्गौरवगणिः,
मणिर्मूर्धन्योऽसौ त्रिभुवनपतेः सृत्वरकरो
जगन्मातुर्मातुर्ननु[31] गुणभिदां को गुणयतु॥13॥

प्रसूनप्राग्भारैर्विकिरति महीं पादपगणः
समात् प्रह्वीभावं व्रतति-ततयः संविदधते।
समीराः सौरभ्यं दधति सरितः पूतसलिलं
तवैवायं मातः प्रसृत उपचारव्यतिकरः[32] ॥14॥

नरी[33] त्वां मन्वानो यदवमननं त्वय्यतनवं
तनूं स्वां ते तन्वाः पृथगणयं यच्च वितथम्,

यदौद्धत्यं बाल्ये तरुणिमनि चाहं व्यरचयं
क्षमामूर्ते सर्वं तदकृतमिव त्वं विगणय।[34] ॥15॥

5. का गतिः

वीतंसे[35] यो निपतति सकृत् तस्य काप्यायतिः स्याद्
व्याधो नेत्रे क्रथतु निभृतं पञ्जरे वाऽपि धत्ताम्,
सूत्रैर्बद्ध्वा नटयतु परं मुञ्चतूत्कृत्य पक्षौ
शूलाकर्तुं पुटयतु च वा, पक्षिणे को विशेषः॥1॥

यां प्रत्यूह-प्रधन[36]-रहितां वीक्ष्य निर्माय नीडं
सोत्साहं सावधृति पृथुकान् सेवमानावपक्षान्,
जायापत्यप्रणयनिपुणौ न्यूषतुः कालकण्ठौ[37]
तां शाखां द्राग् भिदुरहतकः काचभञ्जं बभञ्ज॥2॥

मत्स्याजीवी बडिशमुदधौ पातयत्याशयैव
क्लान्तः सन्नप्यवहितमना अम्भसि स्यूतनेत्रः,
पाठोनं चेन्न खलु लभते मद्गुरेणाप्यतोक्ष्यत्
तावत् सायं झटिति तिमिराक्रान्तनौकः क्व यायात्॥3॥

दुःस्थः कश्चिद् दिवसभृतिकः पण्यवीथीं समाप्य
श्रान्तो रात्रौ चपलचरणे ग्राममुद्दिश्य याति,
उन्माथो[38] यो नियतिरचितो हन्त तस्मात् क्व मोक्षो
मध्येमार्गं विजनगहने भारयष्टिर्व्यखण्डि॥4॥

क्षुत्क्षामः कोप्यवनतशिरा लब्धनैवेद्यशेषो
देवागारात् कतिचिदबलो याति यावत् पदानि,
शून्यं तावन्निजकरतलं व्योम्नि चोड्डीयमानं
काकं त्रोटावपहृतधृतापूपयुग्मं लुलोके॥5॥

वातासारे ज्वरपरिगतो गेहमेत्याजुहाव
स्तेनङ्कारं निशि कृतरवैर्गेहिभिः स्वैर्विधूतः,
द्वारोपान्ते विशरणहतः शीतकायः स पान्थः
पर्यस्ताक्षो विकलकरणः श्वासमुच्चैर्मूमोच॥6॥

1. मृगयापटूञ्छुनः,
2. वृकादयः,
3. युद्धम्,
4. क्रिया राक्षसीविशेषश्च,
5. क्षुदेवांहः पापम्,
6. उत्पीडनम्,
7. व्यजायत
8. चित्परामाणुरूपेण पत्युःप्रवेशो गर्भे विधीयते। तथा चैतरेय-ब्राह्मणे-
   "प्रतिर्जायां प्रविशति गर्भो भूत्त्वा स मातरम्
   तस्यां पुनर्नवो भूत्वा दशमे मासि जायते
   तज्जाया जाया भवति यदस्यां जायते पुनः"
9. यलीकम् = छद्म, मिथ्या।
10. प्रस्तारः पिङ्गलशास्त्रे निरूढः। तथाहि अष्टाक्षरच्छन्दसः प्रस्तारेण भेदबाहुल्य गण्यते। पुत्रेणापि तथैव सापिण्ड्यरीत्या कुटुम्बप्रसारः प्रभवति।
11. साचि = तिर्यक्।
12. विस्रम्भः खलु जनन्यामकृत्रिम एव, रुदितं परं कृत्रिमप्रदर्शनं भवेदिति भावः। विश्वासशङ्कुप्रतिबद्ध एव बालो रोदितीति यावत्।
13. स्तनंधयो स्तनं धमति, मुखेन फूत्कृत्य पिबन् विनोदं तनुते। कुतुपशब्द इह स्तनार्थे लाक्षणिकः।
14. प्रमीला = तन्द्रा, शिशुस्तन्द्रालुर्मुखेन जपन्निव दृश्यते।
15. उपधाय = वक्षोजावुपधानीकृत्य।
16. निलिम्पा देवाः। अभिकाः कामुकाः।
17. निधुवनं कामकेलिः। धुवित्रं मृगचर्मकृतं व्यजनम्। देवाङ्गना स्वर्णदीजले धुवित्रं कम्पयित्वा प्रियाणां कामुमद्दीपयेयुः, तथा तथा क्रीडेयुरिति भावः।
18. दिवि हि न मातुरङ्कं लभन्ते।
19. सध्रीचीना = सहकृता, नीचीना = न्यग्भावं गता, वात्सल्ये नाभिभूता, प्रयोगे = चुम्बनव्यापारे। विषूचीनं विष्वक् कृतरेखं खचनं यस्याः सा। अपीचीनो निगूढः। पराचीनं विवलितं किंचित् तिरश्चीनम्। प्रतीचीना प्रत्यावृत्ता, सकृत् तृप्ति-मनधिगतया पुनः पुनश्चुम्ब्यत इति भावः।
20. सप्तत्यां प्रविष्टः = सप्ततिवर्षदेशीयो वृद्धः।
21. म्रदयति मृदूकरोति।
22. कुम्बा = वृतिः।

23. प्राणः, श्रद्धा, आकाशः, वायुः, तेजः, आपः, पृथिवी, इन्द्रियम्, मनः, अन्नम्, वीर्यम्, तपः, मन्त्राः (वर्णाः), कर्म, लोकः, नाम चेति पुरुषस्य षोडश कला उपनिषत्सु पठिताः, तद् यथा–
"स प्राणमसृजत। प्राणच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नम्। अन्नाद् वीर्यं तपो मन्त्राः कर्म लोका लोकेषु नाम च।" (प्रश्नोपनिषद् 6/4)
24. अभावः खलु वेदान्ते तिरोभावरूपो भाव एवेति।
25. प्रतनुतनवः = सूक्ष्मशरीराणि जन्मसु प्रवर्तमानानि।
26. निमित्तकारणसामग्रीसमवधाने सत्युपादानस्य कार्यात्मना य आविर्भावः स एव भवरूपेण भावो निगद्यते लोके।
27. प्रतिलयः = प्रतिलोमपरिणामे कारणे कार्यस्य लयः।
28. विवर्तः खलु कार्यरूपेण कारणतत्त्वस्यार्भावः। कारणे कार्यधाराया लय एव संवर्तः = पूर्णस्तिरोभावः। वृढयतु = वृहू उद्यमने–क्त–नामधातुः।
29. आक्रीड उपवने। भृशं पौनःपुन्येन क्रीडन्तीति चेक्रीडाः।
30. 'सहस्रं च पितॄन् माता गौरवेणातिरिच्यते' इति मनुः।
31. जगन्माता महामाया च मदीया च माता गुणकृतं भेदं न सहेते इति भावः।
32. उपचारव्यतिकरः = पूजासामग्री।
33. नरीं मानुषीम्।
34. विगणय = मा मनसि कार्षीः क्षमस्वेति भावः।
35. बन्धने,
36. युद्धम्,
37. द्रोणकाकौ,
38. कूटयन्त्रम्।

जगन्नाथ पाठकः

सुकविः श्रीपाठकः फेब्रुअरीमासस्य द्वितीयदिवसे 1934 ई. वर्षे बिहारप्रान्तस्य सहस्रामग्रामं स्वजनुषा व्यभूषयत्। वाराणस्यां विद्यार्जनाय समागतस्यास्य तत्रैव काव्यप्रतिभा विकासमाप। छात्रजीवन एवायम् उमरखय्यामस्य पारसीकमुक्तकानुप्रेरितैः काव्यबन्धैः कामपि ख्यातिं गतः। 1980 ई. वर्षे ऽस्य प्रथमकाव्यासङ्ग्रहः "कपिशायनी" प्रकाश्यतां गतः साहित्याकादमीपुरस्कारेण च गौरवान्वितः। 'मृद्वीका' (1983 ई.) पिपासा (1986) इति सङ्ग्रहद्वयेऽस्य लेखनी नूतनभावजगत् समुन्मीलयति; नव्या विधाः संस्कृतकाव्यभूमावतारयति, अभिनवाश्च कल्पनाः पुरस्करोति।

हिन्दी भाषायामपि तैस्तैः पाण्डित्यमण्डितैः प्रबन्धैः ललितरम्य-रचनाभिश्च पाठकमहाभागः प्रथते। सम्प्रति राष्ट्रियसंस्कृतसंस्थानस्यप्राचार्यपदात् सेवानिवृत्तः प्रयागे निवसति।

1. किञ्चिद् विकीर्णमुच्छ्वसितम्

त्वं काचिन्नभसि प्रभातसमये स्निग्धस्मितार्द्रा प्रभा
पूर्वस्यामरुणारुणेव किमपि द्रागुत्थितोन्मीलसि।
एको भग्नमनोरथोऽश्रुसरसीस्नानार्द्रपक्षश्लथः
क्लिश्याम्येष कुलायकष्टकुहरे लीनो निमीलन्नहम्॥1॥

केचिन्मानसमुद्धता निरगमंस्त्वद्दत्तमाल्याङ्किता-
स्त्वन्निर्देशचमत्कृताः कतिपये सम्प्राविशम् सम्भ्रमात्।
पाणौ शुष्यदशेषपुष्पशिथिलस्त्वद्दर्शनैकाशया
स्थानं हन्त न लब्धवानहमिह त्वन्मन्दिरद्वार्यपि॥2॥

कस्मै हन्त वदेयमद्य निखिलं चित्तस्थमेतावता
पीडाग्निक्वथितं कषायमधुरं स्नेहेन किञ्चित्कटु।

तूष्णीम्भावमतो गृहाण मुखरे मद्वाणि हृत्कोटरे
श्रोतव्यं ननु यस्य, नैव स जनः श्रोतुं समुत्कण्ठते।।3।।

धूमोद्गारमवाप्य दृष्टिविरसं चिन्ताश्मशानस्थलात्
ज्योतिर्दीपगणादवाप्य निहितात् काङ्क्षासमाधावथ।
दौर्भाग्यानिलनेत्रवारिमिलितं सान्द्रासु सन्ध्यास्वदो
नो जाने क्वचिदन्तरन्तरतमे यत्किञ्चिदुज्जृम्भते।।4।।

सम्पूर्णाय न देव काचिदुदिता क्षुद्रे मदन्तस्तमे
त्वत्कारुण्यसुधामहाजलधये तीव्रातितीव्रा तृषा।।
एतस्याः प्रशमाय केवलमलं तस्माद् विकीर्णं पृषत्
चेन्नो दास्यसि तत्कथं विरमतामेष प्रतीक्षाग्रहः।।5।।

नाहं त्वत्करनिर्गतान् सुखकणान् भोक्तुं समग्रान् क्षमो
नो वा दुःखकणांस्तथा क्षणमपि स्वीकर्तुमेवोत्सहे।
दुःखं वापि सुखं न यत्र सहजं त्वद्दृष्टिपातोल्लसत्
त्वत्कारुण्यमिहैकमेव तृषितो यत्किञ्चिदभ्यर्थये।।6।।

द्वारि द्वारि गतो गवेषितुमपि त्वां नो लभे कुत्रचित्
प्राप्तस्त्वं तु सदा निलीन इव मच्चेतोगृहाभ्यन्तरे।
यच्छुष्कं परितप्तमर्थरहितं सङ्कीर्णमासीत् पुरा
तत्पूर्णं विचलत्तरङ्गमधुना विस्तारि मे भासते।।7।।

मत्स्पर्शाद् विकृतिं भजेत विगलेद् वा मत्कराग्रदियं
स्याद् वा त्वन्मनसोऽनुकूलमपि नो मत्कृत्यमित्यन्ततः।
त्वल्लावण्यनिरीक्षणप्रचलितान्तर्वृत्तिरप्यन्यथा
नो शक्नोम्युपवर्त्तुमेष बत मे भीत्येव वक्त्रावृतिम्।।8।।

2. गजलगीतानि

(1)

ये तटेऽपीह निमज्जन्ति जनास्ते वन्द्याः
ते तरङ्गैः सह सङ्घर्षरतास्ते वन्द्याः।।1।।

वैभवं तामसमङ्गीकुरु नो हानिरिह,
स्पर्धमानाः परमर्केण जनास्ते वन्द्याः॥2॥

वैतसीं वृत्तिमुपाश्रित्य नमन्तो वन्द्याः,
भग्नतां येऽपि गता नैव नतास्ते वन्द्याः॥3॥

पीडिताः केचिदिमे हन्त रुदन्तो वन्द्याः,
पीडया केऽपि परीताश्च हसन्तो वन्द्याः॥4॥

दुर्दिनान्येवमुपायान्ति त्वनाहूतानि
स्वागतीकृत्य समाधानरतास्ते वन्द्याः॥5॥

ये कठोरा ननु वज्रादपि रे ते वन्द्याः
ये च कुसुमादपि मृदवस्तु जनास्ते वन्द्याः॥6॥

अन्धमुत्तीर्य तमो मार्गमवाप्ता वन्द्याः
ये प्रकाशेऽपि च विचलन्ति पथस्ते वन्द्याः॥7॥

स्वेषु ये स्निग्धतमाः केऽपि जनास्ते वन्द्याः
ये विपन्नेषु दयन्ते च जनास्ते वन्द्याः॥8॥

(2)

दृष्टिपातो नैव यावत् तावको जीवाम्यहम्,
योऽस्मि सोऽस्मि सुदूरवर्तिनि ! तावको जीवाम्यहम्॥1॥

नैव जातौ हन्त पक्षौ नाक्षिणी उन्मीलिते
नीडगः क्षुधितस्त्वदीयः शावको जीवाम्यहम्॥2॥

न त्वमेष्यसि शीघ्रमिह चेद् यामि रे प्रशमं क्षणम्,
भस्मनावृत एष कश्चित् पावको जीवाम्यहम्॥3॥

भाग्यमेतदितो मदीयं धन्यवादस्त्वत्कृते
त्वत्पदाम्बुजयोः कृतः सन् यावको जीवाम्यहम्॥4॥

न क्षमश्चलितुं विचिन्वंस्त्वां मृगाक्षि वने वने
कण्टकैः क्षतविक्षतः सन् धावको जीवाम्यहम्॥5॥

हन्त वाचालास्त्वयेमे तावकाः सम्मानिताः
मूक एष उपेक्षितस्ते तावको जीवाम्यहम्॥6॥

का स्मृतिश्च जिजीविषेयं का च भारः सर्वथा
त्वद्वियोगे पश्य विस्मृतभावको जीवाम्यहम्॥7॥

(3)

किन्नु ते दीयतामुत्तरम्
अस्मि प्रश्नस्त्वमस्युत्तरम्॥1॥

गन्ध आयाति कस्मादहो
उत्तरीयं तवास्त्युत्तरम्॥2॥

यस्य मौनं भवेद् भाषितम्
तस्य देयं किमस्त्युत्तरम्॥3॥

अस्मदस्तित्वमन्धं तमः
रश्मयस्त्वद्दृशोरुत्तरम् ॥4॥

हन्त के के न पृच्छन्ति माम्
दीयतां कस्य कस्योत्तरम्॥5॥

यस्य जायेत चित्ते हठः
नास्ति नास्त्येव तस्योत्तरम्॥6॥

यो नहीत्येव सम्भाषते
उत्तरं तस्य नास्त्युत्तरम्॥7॥

(4)

समुदेति सुप्रभाते किमु तस्य मन्दहासः
स्फुरतीव चन्द्रहासः किमु तस्य मन्दहासः॥1॥

मम चेतसो नवीनो वत कोऽपि बन्धहेतुः
मृगयोरिवैष पाशः किमु तस्यमन्दहासः॥2॥

मुरलीरवोपमेन स्वरसम्भरेण कलितः
वृन्दावनस्य रासः किमु तस्य मन्दहासः॥3॥

मृदु सौरभेण भरितः सुमनो विकासहेतुः
सरसोवसन्तमासः किमु तस्य मन्दहासः॥4॥

सुरभिः शकुन्तलाया मृदुकल्पनाभिरधिकः
स्वगुणेन कालिदासः किमु तस्य मन्दहासः॥5॥

परिमार्जितं नवीनं शरदिन्दुचन्द्रिकाभिः
कमनीयशुक्लवासः किमुतस्यमन्दहासः॥6॥

किरणेन सम्पिनद्धो मृदुना हिरण्मयेन
प्रसृतोऽथवा विलासः किमु तस्य मन्दहासः॥7॥

रमणीयताप्रगुणितो रदनच्छदावभासः
मृदुप्रच्छदाख्यवासः किमु तस्यमन्दहासः॥8॥

'अभिराज'-राजेन्द्रमिश्रः

अभिराजो राजेन्द्रः जौनपुरजनपदस्थद्रोणीपुरग्रामे 2000 विक्रमाब्दे पौषशुक्लः पञ्चम्यां जनिमलभत। शैशव एव दिवङ्गते पितरि नानाकष्टततिं साहं साहं विविधसङ्घर्षसमवायसङ्कुलं जीवनमेतस्य समजनि। 1964 ई० वर्षे प्रयागविश्वविद्यालयात् प्रथमश्रेण्यां समस्तसङ्काये सर्वप्रथमं स्थानमधिगम्य संस्कृतेन स्नातकोत्तरपरीक्षामयमुदतरत्। सम्प्रति तत्रैव प्रवाचकपदे कार्यरतः। वर्षद्वयमयं इण्डोनेदेशेयवद्वीपे उदयनविश्वविद्यालये ऽतिथिप्राध्यापकत्वेनोवास। संस्कृतसाहित्यमस्य अष्टदशकाव्यप्रबन्धाः प्रकाशितचरा विभूषयन्ति, येषु नव पुरस्कृताः। इक्षुगन्धेति कथासङ्ग्रहाय 1986 ई० वर्षस्य केन्द्रियसाहित्याकादेमीपुरस्कारमयमवाप। संस्कृते विंशतिप्राया अस्य ग्रन्था प्रकाशनद्वारि स्थिताः। हिन्द्यां भोजपुर्यामपि प्रचुरमयं वाङ्मयं पुरश्चकार। नाट्ये महाकाव्ये मुक्तकेषु गीतिषु गलज्जलिकासु कजरीप्रभृतिलोकगीतेषु कथासु चास्य दक्षा लेखनी अप्रतिहतमबाधं विपुलं नानाविधं साहित्यमसृजत्। यवद्वीपस्य रामायणककविन् काव्यस्य देवनागरीलिप्यन्तरपुरस्सरमनुवादः थाईभाषायां संस्कृतसाहित्येतिहासः नैकेऽन्ये च ग्रन्था वैपश्चितीमप्यस्य प्रमाणयन्ति।

1. जानकीजीवनम्

ततः कदाचिन्निमिराजनीवृति
प्रवृद्धसौख्यै हरतालिकाभिधम्।
समाययौ पर्व सुवासिनीजन
प्रियं प्रियप्राप्तिफलं मनोहरम्॥1॥

विधाययुग्मं मिथिलाकुमारिका
इतस्ततोऽन्वेषणरूपणान्विताः ।
जगुर्मनोज्ञां कबरीमुपोषिताः
परिभ्रमन्त्यो गृहतो गृहं मुदा॥2॥

मृदैकपिण्डे शितिशूकसंहतिं
निवेश्य बालाः सतताभिषेचनैः।
प्रवर्धयामासुरथैतदङ्कुरान्
वितस्ति दीर्घान् कचपाशसन्निभान्॥3॥

विदेहजाप्युत्सववासरागमे
विडम्बयन्ती सहचारिणीव्रजम्।
कृताभिषेका धृतनव्यशाटिका
यवान् बबन्धाधिसहोदरालकम्॥4॥

प्रभूतराशिं मणिरत्नवाससा-
मवाप्य तेभ्यो मिथिलाधिपादपि।
ददौ समग्रं भगिनीभ्य ऊर्जिता
रुचा सखीभ्यश्च विभज्य तत्क्षणम्॥5॥

अपूपुजद्धैमवतीं सहालिभिः
प्रदोषकाले स्वसृभिर्विमण्डिता।
वरन्नु याचस्व मनोरमं शुभे
सखीभिरुक्तेतिललास सुस्मिता॥6॥

भवत्यहो किंस्विदिदं वराभिधं
पदार्थजातं यदिह प्रयाच्यते।
इति प्रजाताधिगतं रहस्यकं
प्रयत्नरूढापि न वेद मैथिली॥7॥

तथापि तस्या मनसि प्रभामयी
प्रकल्पनैकप्रतिमा पदं दधे।
यथाम्बुतल्पे प्रतिबिम्बिताङ्कित-
श्चकास्ति वापीतटजोऽप्यनोकहः॥8॥

प्रभातकाले प्रथमं प्रबुद्ध्य सा
क्रियाश्च निर्वर्त्य निसर्गसम्मताः।
सुतीयितं गेहविहङ्गमव्रजं
सुभोजयामास कलानुरञ्जिनी॥9॥

ततश्चतुश्शालमुपेत्य सत्वरं
प्रमार्ज्य वस्त्रैरभिषिच्य वारिभिः।
धनुः पिनाकाख्यममेयविक्रमं
शिवप्रदत्तं प्रणनाम साञ्जलिः॥10॥

प्रभूतवत्सेऽपि नृपालमन्दिरे
गुणैरुदारैस्तनुकान्तिसम्पदाः ।
जिगाय हृन्दि प्रसभं समीयुषां
प्रजाजनानां क्षितिजैव नन्दिनी॥11॥

—जानकीजीवनमहाकाव्यतः

2. कावेरी

संस्मारयति सुखं कावेरी!

चञ्चल शुभ्रजला हिमतरला
कविजनमाहिता विधुकरधवला

तुलयति जह्नुसुतां कावेरी!

दक्षिणदिशि विलसत्यभिरामा
त्रिशिरःपुरी ललामललामा

गिरिमपि मन्दिरयति कावेरी!

सप्तावरणरक्षितं भवनम्
श्रीरङ्गे वृतगोपुरचयनम्

शेषशयं सुखयति कावेरी!

प्राच्यां जम्बुकेश्वरो देवः
कृताखिलाण्डेश्वरी सुसेवः

जललिङ्गं प्रथयति कावेरी!

श्रीरङ्गं खलु दर्शं दर्शं
हृदयम्मे तनुते नवहर्षम्

चुलुकममृतयति किल कावेरी!

ते यात्रादिवसा मम जीर्णाः
संस्मृतयो न तथापि विशीर्णाः

दाक्षिण्यं द्रढयति कावेरी!

मीनाक्षीं बृहदीश्वरपादम्
चिदम्बरं सुखमयसंवादम्

अनुभावयति झटिति कावेरी!
संस्मारयति सुखं कावेरी!

3. पुरुरूप सागर!

पुरुरूप सागर! तावकं दृष्टम्मयाऽखिलवैभवम्!
जलभूप सागर! तावकं दृष्टम्मयाऽखिलवैभवम्॥1॥

उत्तुङ्गफेनजलाकुलः कस्मै वृथा कुप्यसि विभो!
अयि रुद्ररूप पयोनिधे! ननु लक्ष्यसे भुवि भैरवम्!॥1॥

अथवा धुनोसि शिरः सखे भारतधरापदपङ्कजे
अयि वत्सरूप सरित्पते! ननु रोचते तव शैशवम्!॥2॥

तव लोललहरिकराञ्चितः प्राचीसमीर इहागतः
विदधाति पावनपावनं कायं विभावितमार्दवम्!॥3॥

गङ्गाञ्चले निवसाम्यहं गङ्गापतिस्त्वमपि ध्रुवम्
तनुजस्तवेत्थमहं पितः कुरु मां कदर्थितकैतवम्!!॥4॥

तव गर्जितं श्रुतिशष्कुलीं सङ्गीतकेन हृतात्मना
सम्पूरयत्प्रपुनात्यहो सिन्धो महत् तव गौरवम्!!॥5॥

4. मिहिरावलिः

बारं बारं त्वमपि लोकिता
भग्नपञ्जरा भुग्नकन्धरा
क्षत विक्षतविग्रहा दुग्रहा
श्रीहतनेत्राभ्यां
मिहिरावलि!

त्वत्प्राङ्गणे न कलकलनादो जलसरणीनां
यावकरसरञ्जितवचरणानां नैव मुखरता
क्षुद्रघण्टिकामण्डितनूपुरसंवलितानां
गतागतं नो

चारणवन्दिद्विजनिवहानाम्
त्वमसि खण्डिता
प्रोषितपतिका
मिहिरावलिके!

किन्तु निर्दिशति ते सौभाग्यं
विष्णुध्वजः स्थाणुरिव
प्रत्यक्षीकृतशतसहस्रघनमासनिदाघः
चन्द्रनृपतिकीर्तिश्रीसाक्षी!

लक्षमिता दर्शका विरूपां त्वां सन्द्रष्टुं
समायान्ति देशतो विदेशात्
सुभगम्मन्याः
बण्डभण्डपामरा युवानो
बाला वृद्धाः
मधुयामिनीनिमज्जितहृदया दयिता भक्ताः
चारं चारं भ्रामं भ्रामं भुग्नभित्तिषु
नयनासेचनकं कलयन्तः
ननु ताम्बूलपत्रगण्डूषैराविलयन्तः
गृहं निर्वतन्ते निशामुखे
ज्ञाता किन्तु केन तव पीडा?
अयि मिहिरावलि!

5. शतशतशूलवेदनास्पन्दै–

श्छिन्ना भिन्ना
नतोन्नतं स्वातीतजीवनं
विततैतिह्यं

सम्प्रति गणयन्ती त्वं पथिकै-
र्मुदा दृश्यसे
दिल्लीनगरपरिसरे लोकः पश्यति भवतीं
निखिलां दिल्लीं त्वयि निभालये
किन्त्वहमेकः

अभिशप्ते!
अयिगीतमगेहिनि!
अयि पाषाणि!
तपो वर्धतां ते निरन्तरम्
कालो ह्ययं निरवधिर्विपुला
पृथिवी चेयं
समागमिष्यति शीघ्रमेव कश्चित् करुणार्द्रः
रघुनन्दनस्सुधासंस्पर्शः
स्पृष्टा येन पुनर्लब्धा त्वं
निजसौभाग्यं
निजसौराज्यम्!

6. मणिकर्णिकाघट्टे

मणिकर्णिकाघट्टे दिष्ट्या स्थितोऽहम्।
सत्यादृते सर्वैः स्निग्धैश्च्युतोऽहम्!!॥1॥

स्वप्ने मया किञ्चिद् दातुं प्रतिज्ञातम्
आजीवनं तस्मात् प्रेतैर्वृतोऽहम्!॥2॥

धाराधराः कामं वर्षन्तु वीथीषु
जातो मरौ शाखी शाखोटकोऽहम्!॥3॥

मथ्नन्तु काव्याब्धिं मां मन्दरीकृत्य
यत् काश्यपे पृष्ठे सम्यक् स्थितोऽहम्!॥4॥

काव्यप्रकाशत्वं कस्मान्न मे वन्द्यम्
हृद्ये दशोल्लासे सप्तान्वितोऽहम्!॥5॥

नो साहसाङ्कानां गोष्ठ्या बहिष्कार्यः
कामं कुविन्दोऽस्मि काव्येरतोऽहम्!॥6॥

अस्मिन् पुरे यावद् गायामि गीतानि
जाने यथा धाराधीशैः श्रुतोऽहम्!॥7॥

मां संस्कृते! खेदं चिन्तां व्यथां कार्षीः
पुत्रोऽभिराजस्ते लोके धृतोऽहम्॥8॥

राधावल्लभः

राधावल्लभः फेब्रुअरीमासस्य पञ्चदशमे दिने 1949 ई॰ मध्यप्रदेशेषु राजगढ़जनपदे जनिं लेभे। संस्कृत-हिन्द्याङ्ग्लभाषासु नवोत्तरशतं ग्रन्था अस्य प्रकाशिताः येषु काव्यशास्त्र-नाट्यशास्त्र-संस्कृतकाव्या-दिविषयानधिकृत्य विमर्शपूर्वं विरचिताः केचन प्रबन्धाः कथासङ्ग्रहत्रयी उपन्यासः पञ्च संस्कृत काव्यसङ्कलनानि च परिगण्यन्ते।

1. विमानाद् भूदर्शनम्

शुभ्रा स्वच्छा हिमकणततिर्दृश्यते या विमानात्
कीर्णा नीचैरुपरि परितश्छाद्यमाना समन्तात्,
पश्याम्येनां रजतसदृशीं राजमानां मनोज्ञां
भक्तिच्छेदैरिव विरचितां भूतिमङ्गे धरित्र्याः॥1॥

यद्वा, दृष्टं वियति मनुजैर्वस्तु यद् विप्रकृष्टं
नीचैः संस्थं न खलु विततं वर्तते तादृशं तत्,
नानारूपैः प्रकटयति न सान्यथाकृत्य सृष्टिं
स्वोन्मेषैस्तैः कविकुलगुरोस्तस्य चैकस्य दृष्टिः॥2॥

एषा शेते ह्यलसलुलिता क्लिन्नगात्रीव शीते
प्रच्छाद्य स्वां शिथिलिततनुं तूललेशैर्धरित्री,
जाड्याधिक्यादतिहिमजडा ग्लप्यमानातिदीना
जाता मन्ये शिशिरमथिता पद्मिनी वान्यरूपा॥3॥

निर्वाते किं वियति विपुले विश्वनीडो ललम्बे
निःस्पन्दत्वं कथमिह गतश्चायमोको जनानाम्,
पश्याम्येनां निभृतनिभृतां म्लानगात्रीं धरित्रीं
साभ्रेऽह्नीव स्थलकमलिनीं न प्रबुद्धां न सुप्ताम्॥4॥

शब्दाख्येयं यदपि किल तद् वस्तुजातं समग्रे
लोके, लोक्यं विविधकलया रोचनैर्लोचनैर्वा,
आयत्तं तत् कथमिह भवेन्नूतनैः स्वीयशब्दै-
र्मन्दाक्रान्ता कविकुलगुरो सज्जते यत्तु चित्ते॥5॥

स्यूतं स्यूतं पुनरपि च यच्छीर्यते धार्यमाणं
गात्रे क्लृप्तं कथमपि तथाऽऽच्छादने नालमेव,
धृत्वा देहे हिममयमिदं श्वेतकार्पासवस्त्रं
पृथ्वी चास्ते विकलकरणा निर्धना गेहिनीव॥6॥

चक्रः किं वा भ्रमति विततः कालकौलालनुन्नो
न्यस्तः पिण्डो लघुरिव मृदः पर्वतो भाति मध्ये,
दृष्टा पृथ्वी भ्रमितविधुराऽलातचक्रप्रभैषा
सिन्धुर्बिन्दुर्भवति वितता दीर्घिका चाप्यदीर्घा॥7॥

अन्तं यातः शिशिरसमयो नो हिमानी व्यपेता
आर्त्ता जाता धरणिरिह किं कालवैकल्यभावात्,
सैवानन्या सहजसुलभा विद्यतेऽस्यास्तितिक्षा
सोऽपि स्नेहः शिशुजनगतः सैव चास्याः प्रतीक्षा॥8॥

औदार्यं तद् विकटपृथुला रम्यता सैव तद्वत्
सैवेषाऽऽस्ते धृतिगतिमती मातृरूपा धरित्री,
पश्यन्नेतां परित इव तां देवतां मन्दिरस्थां
ध्यायं ध्यायं मुदमनुपमां व्योमपान्थो जगाम॥9॥

सर्वं देव्या अतुलितकथं वन्द्यहृद्यस्वरूपं
साक्षाद् दृष्ट्वा चकितमनसा चिन्तयामास पान्थः,
किं नोऽजानां प्रतिशिशुजनं प्रेम विश्वम्भराया
अस्या अङ्के मृदुलपृथुले यापयन् दीर्घकालम्॥10॥

बीजं प्रेम्णो निहितमभवद् यद्धि चित्तेऽप्ररूढं
शुष्के क्षेत्रे सलिलपतनोद्भिन्नमासीत् तदानीम्,
चित्ते स्वीये विगलनकरी भावना तेन तेने
स्वेष्टे वस्तुन्युपचितरसा प्रेमराशीभवन्ती॥11॥

—धरित्रीदर्शनलहरीतः

2. शुष्कं सरः

बलिं दत्त्वा शूरो यदिह वनजारः कलितवान्।[1]
यदेकं प्राणानामभवदवलम्बश्च नगरे।
सरस्तत् कालेन व्रजितमतिदीनां खलु दशां
हतां दर्शं दर्शं भवति हृदयं दूनमिव याम्॥1॥

अनूचानैः पूर्वं विहितमयनं लोकनयनं
यथाऽद्यत्वे जातं मलकलिलपङ्कैकवलितम्।
तथा नश्चेतोऽदो व्रणयति सरः सागरगतं
परं शुष्कं साधोर्हृदयमिव नाशेन सुहृदाम्॥2॥

स आश्वस्तो नेता वदति बहुभङ्गीभणितिभिः
करिष्यामः शुद्धिं सरस इति चाश्वासयति सः।
परिध्वस्तं जीर्णं भवनमिव शीर्णं किमु सरो
विवेकभ्रष्टानां पतनमभितः सूचयति तत्॥3॥

यथा नात्र स्नानं भवति ननु घट्टेष्विव पुरा
जलं जातं सर्वं क्षुभितमिव राष्ट्रं कलुषितम्।
तथा नश्चेतांसि व्रणयति सरः सागरगतं
रसो बीभत्सोऽर्वाक्तनरसिकलौकैरिव हतः॥4॥

न या मम्लौ कम्रा तरणसवनस्ननिरतै-
र्नरस्त्रीबालानां शतश इह सङ्घैर्जलततिः।
इदानीं सा शृङ्गाकुलितजलभङ्गास्ति महिषै-
र्वराहैर्वा मुस्ताक्षतिमपि च कुर्वद्भिरभितः॥5॥

विदीर्णैषा भूमि प्रखरतरहिंस्त्रार्ककिरणै-
र्जलं जातं धूलिप्रचयकलुषं स्त्यानरुधिरम्।
सरो भ्रश्यद्बन्धं परिगलितसत्त्वं गतरसं
व्यथावृत्तां मन्ये कथयति कथां भारतगताम्॥6॥

यथा दृष्टं दूरात् क्वचन कुहरे लीनमिव तन्-
मनस्तापं धत्ते सकलमुपतापं च जनयत्।
पुनर्दृष्टं मार्गे जडयति पुरोगामिनि मनः
पुराभूतः शोको व्यथयति यथा नूतन इव॥7॥

गतं शैवालं तत् परिहसितदर्भाङ्कुरचयम्
अतन्द्रा चन्द्राभा तदनु विहता सा कुमुदिनी।
कथञ्चित् तिष्ठन् यो घृणितमलपङ्काकुलजले
परं दीनो मीनः क्व नु खलु सरेत् पक्षरहितः॥8॥

सारोऽदभ्रे श्वभ्रे प्रकटयति तत् स्वीयमुदरं
क्षुधाखिन्नो दीनो ग्लपितवदनः कश्चन यथा।
गता वर्षास्तृष्णां कथमपि न हृत्वाऽस्य सरसः
कथञ्चित् तत्प्राणित्यहह नलिकाकर्दमभरैः॥9॥

3. कविस्मृतिः

यक्षो मनो मदीयं कविता त्वलकापुरी त्वदीया सा।
मध्ये च वर्तमानो विलम्बते कालमेघोऽयम्॥1॥

रामगिरौ संसारे जीर्णारण्ये मुहुर्मुहुः प्लुष्टः।
दवदहनज्वालाभिश्चिन्तासन्ततिभिरहमनिशम् ॥2॥

तव स्मृतिः सहसा सा सीकरसन्ततिरिवावतरन्तीह।
प्रशमनफलं विधत्ते चापन्नार्ते मदीयमनसि॥3॥

स्मरति मनो मे यावत् तव नवसंस्कारपूतभारत्याः।
तावन्नैव विधत्ते रतिमिह पापे न वा तापे॥4॥

एकान्ते ध्वान्ते मे विधुरा सीदति मनोदशा नितराम्।
दीपशिखेव ज्वलिता स्फाटिकयोगेन ते वाण्याः॥5॥

आपूरितकेदारे जीवति युक्तस्तु शुष्ककेदारः।
जीवितुमिह वाञ्छामि त्वयि युक्तस्तथा चाहमपि॥6॥

अभिनवसुन्दरतायाः सहचर, सह चर मया स्वललितपदैः।
वसन्ते ऽनन्ते वान्त-विकासिसुमसुरभितवनान्ते॥7॥

अवतर कविवर हालाहलपरिपूरितभवेऽस्मदीये त्वम्।
ऊयिकाभिरिव जग्धे ग्रन्थागारे विनष्टचरे॥8॥

विचर मया सह विन्ध्ये सुषमावन्ध्ये विखण्डितसत्त्वेऽपि।
खल्वाटे कान्तारे प्लुष्टप्राये च भूखण्डे॥9॥

घुणलग्ने सुविशाले काष्ठागारे तथैव समायाहि।
धीवर-विहितं प्रश्नं समुपस्थापय पुनः सुकवे॥10॥

वरमिमस्मभ्यं त्वं कविवर देहि यजनेऽपि सृष्टेर्नः।
धूमाकुलदृष्टीनां पावक एवाहुतिः पततु॥11॥

4. कालिदासवन्दना

भावावेशाद् रसिकहृदये या पदं न्यस्य मुग्धा
मन्दाक्रान्ता ह्यभिनवमधूवन्मनोहारिणी सा।
यत्काव्याभा सहृदयदलं मोहयत्येव सद्यो
वन्दे तं वै सरसरचनं कालिदासं कवीशम्॥1॥

प्रत्यादेशाद् विधुरहृदयां भर्त्सितां तां मुनिभ्यां
नारी दीप्तां तदपि न रुषं नैव मानं त्यजन्तीम्।
तामेतां यः प्रतिसहृदयं मूर्तयामास चित्ते
वन्देऽहं तं ललितवचनं कालिदासं कवीशम्॥2॥

एकान्ते यः स्मरति सततं स्वीयकान्तागुणानां
शून्येऽरण्ये करुणकरुणा लीयते यस्य वाणी।
गुह्यां ज्ञातुं प्रभवति कविर्गुह्यकस्यास्य पीडां
वन्देऽहं तं तरलहृदयं कालिदासं कवीशम्॥3॥

अभ्युत्थानं व्यसनमखिलं मानवीनां प्रजानां
दृष्टं येन प्रकटितमिदं दर्शनाद् वर्णनाच्च।
राजन्तं तं ह्युपरि परितः काव्यविश्वे समस्ते
वन्दे नित्यं कविकुलगुरुं कालिदासं कवीशम्॥4॥

5. रसवती

पलाण्डुच्छेदने निर्गतं नयनयो-
र्लावण्यमयं बाष्पजलं
सहैव चैव विच्छुरितं

मधुरमधुरं स्मितं तथोष्ठयोः
एतद्द्वयमपि सम्मेल्य कटाहे
घृतेन भर्ज्यते यदा
उत्तिष्ठति धूमस्तदा कषायमधुरो रसवत्यां
देवानामावाहनं विधत्ते,
अथ हरिद्रासदृशमुज्ज्वलं रूपं धृत्वा
सौगन्ध्यकं वितन्वाना कुस्तुम्बर्याः
अवतरत्यन्नपूर्णा साक्षात्
रसवत्यामस्याम्
अन्नब्रह्म साकारयन्ती।

6. धराशिशुनर्तनम्

ब्रह्माण्डे विततते लसन्ति शतशो ये कोटिशास्तारका
दूराद् दूरमितो गताः कथमहो ज्ञातुं नु ते शक्नुयुः।
अत्यन्तं निविडं निलम्ब्य निभृतं बिन्दुप्रभे कोणके
सृष्टेः रङ्गमधि क्वचिच्छिशुसमा पृथ्वी नरीनृत्यति॥1॥

ग्रावप्रख्यहिमार्द्रनेत्र इह तां चन्द्रो मुधा पश्यति
सूर्यस्तप्तरुषारुणः पुनरिमां निर्वर्णयन् संस्थितः।
सा चोत्तालसहास्यलास्यमधुरं नो भावयन्ती त्वमूः
स्वात्मन्येव रता वरा शिशुधरा भूयो नरीनृत्यति॥2॥

निःश्वासा बहुसीत्कृतानि रुदितं दुःखं च तद् दारुणं
हाहाकाररवाश्च घोरविकाटास्तत् क्रन्दनं शोकजम्।
उच्छ्वासा बहलाः क्षणाः सुखघनाः आनन्दरूपायिताः
सर्वं चैतदहो धराशिशुकृते सम्मिश्रितं नर्तने॥3॥

अल्पा यद्यपि किन्त्वभूद्धि महती कालेन चैतावता
कोटीभिः किल कोटिकोटिजनतामाला तु जातास्ति यत्।
सेयं संस्खलतीह चापि पतिता चोत्तिष्ठते नर्तने
सोन्मुक्तापि न जायते क्वचिदियं स्वस्या धुरो विच्युता॥4॥

मध्येऽस्या रशनायितौ प्रविततौ पूर्वापरौ तोयधी
पादेऽस्याः स च नूपुरायित इह प्रत्यङ्महासागरः।
हस्तेऽस्या वलयायिता हि सरितस्तेकर्णपूरायिताः।
सानुभ्यः स्खलिताः क्वणद्ध्वनियुताः स्रोतःप्रवाहाः सुखम्॥5॥

दूरात् द्रष्टुमिमां क्वचित् प्रयतते नीहारिकायां स्थितः
कश्चिद् वृद्धग्रहो ग्रहेण नयनं व्यापारयन् व्याकुलः।
दृष्टिर्यावदमुष्य चात्र घटते पश्येत् स यावत् धरा-
मब्दाः कोटिशतं प्रकाशगणितास्तावद् व्यतीताः पुनः॥6॥

को जानाति ग्रहः स कालगिलितो वा शिष्यते सम्प्रति
शिष्टा यद्यपि चास्ति तस्य पतिता रश्मिर्धरासङ्गता।
तां रश्मिं परिगृह्य खेलति पुनश्चैषा प्रसन्ना धरा
कृत्वाऽस्याः किल नूतनां च ललितां क्रीडाकलापुत्तलीम्॥7॥

7. गृहलहरी

के गेहा? न बहिर्भवन्ति ननु ये, तत् कुत्र ते स्युः पुन-
र्नूनं तेऽन्तरहो भवेयुरथ किं तद् वस्तु यत्र स्थिताः।
सा निश्चप्रचमेव स्याद्धि गृहिणी यस्यां गृहाः संस्थिताः
गेहेष्वेव न सा भवत्यविकला गेहा हि तस्यां स्थिताः॥1॥

यावच्चन्द्रमरीचिकोमलमिदं तस्या मुखे च स्मितं
शय्यामास्तृणुते गृहे सुखकरीं कह्लारपङ्क्तिप्रभाम्।
तावत् पुष्पसुगन्धिसौरभमयास्तावच्च सौख्यप्रदा
गेहास्तावदिमं जनं सुमसृणं बध्नन्ति मुक्तिप्रदाः॥2॥

नैते दारुभिरेव नैव च मृदा नैवेष्टकाभिर्गृहा
निर्मीयन्त इमे न चापि विधृतास्ते वज्रलेपैर्दृढैः।
सङ्कल्पस्य वृतिं च शीलकलितां भित्तिं तथास्थाच्छदिं
स्नेहस्य च वज्रलेपघटनं कृत्वा गृहा निर्मिताः॥3॥

वज्रादस्ति कठोरमेव हृदयं पुष्पात् तथा कोमलं
कारुण्यामृतवर्षि दुष्टदमनं लोकोत्तराणां यथा।

यावन्तः क्षणभङ्गुरा गतधुरः सद्यो विशीर्णास्तथा
तावन्तः सुदृढा भवन्ति च गृहा एते चिरं स्थास्नवः।।4।।

वास्तुब्रह्मणि मण्डनैर्विलसिते विन्यस्तरेखाञ्चिते
साकारत्वमुपागतेऽतिविततते विश्रान्तिमाप्ताः सुखम्।
कोट्यस्तास्त्र्यधिका इहैव लसितास्त्रिंशत्सुराणां शुभा
गेहाः सन्ति सजीवविग्रहमया देवा समस्ता इमे।।5।।

शीतेनोद्धुषितस्य कम्पिततनोरश्वत्थपत्रप्रभं
गेहा आवरणं भवन्त्यतितरां सोष्णास्तथोर्णासमाः।
अङ्गारप्रखरान् विमुञ्चति करान् ग्रीष्मे यदा भास्कर-
श्छत्रीयन्त इमे तदातिमसृणच्छायाश्च विस्तारिताः।।6।।

याते क्वापि बहिर्गृहाद् गृहपतौ तिष्ठन्त्यनाथप्रभाः
चिन्तासन्ततितन्तुजालनिविडस्यूतास्त्वपत्ये गते।
हाहाकारसमाकुलास्तु नितरां यातेषु दारेषु ते
गेहास्तेषु समागतेषु च पुनः सोच्छ्वासमाप्ताः सुखम्।।7।।

किं गेहा ननु तेऽङ्गणैर्नहि रवा यत्र श्रुताः काकजाः
किं काकाः किल ते रटन्ति नहि ये स्थित्वा तु गेहच्छदौ।
किं काकस्य ध्वनिः स यो गृहजनं नोत्कण्ठयेत् कौतुका-
दुत्कण्ठापि च किन्नु सा न खलु या सम्भावयेद्धाऽतिथिम्।।8।।

गेहेभ्यो बहिरस्तु कापि हरिता सा शाकवाटी सदा
गन्धाढ्यां च वसुन्धरां विदधती कुस्तुम्बरीपादपैः।
यत्रारूढलताप्रताननिचयादारुह्य गेहच्छदिं
सामोदं परिपश्यतां परिजनः कूष्माण्ड्यलाबूस्तथा।।10।।

धौताः सर्व इमे गृहाः श्रमभरक्लेशाद् गृहिण्याऽद्य मे
प्रोज्झन्त्या किल चञ्चलाश्चुलुकिता गर्ता बहिस्सारिताः।
एते ते शिशवो यथा निपतिता पृष्ठे गृहस्याङ्गणे
बिम्बं स्वं किल तेषु पश्यत इमावाम्रश्च जम्बूस्तथा।।11।।

विद्युन्नास्ति गृहे न पक्षतिरहो नो शीतयन्त्रं चलेत्
वाता वान्ति तथोष्णमर्मुरकिरः काले महोष्माकुले।

छायां यावदुपागतोऽह्नि परुषे ग्रीष्मेऽस्य जम्बूतरो-
र्मञ्जयो विनिपातिताः शिरसि मे त्वेतेन सामोदिना॥12॥

मूलैः स्वैर्भुविविप्रकृष्टनिहितैर्गूढं रसं कर्षतः
जम्बोरस्य लताप्रतानसदृशः स्वप्नो भवेत् कश्चन।
एते ते शिशवः स्वपाठ्यनिरता वा लेखने व्यापृताः
आगत्येह फलान्यमूनि चिनुतां स्कन्धेऽधिरुह्यात्र मे॥13॥

गेहेभ्यो मन उत्सुकं भवति मे यातुं बहिः सर्वथा
ग्रीष्मे शीतदिनेषु किन्तु गमनं नैभ्यस्तु सम्भाव्यते
जाने तद् बहिरेष फुल्लकुसुमे यास्यामि चाप्ते मधौ
यद् वा प्रावृषि सीकरव्यतिकरे रोमाञ्चितायां भुवि॥14॥

गेहेभ्यः किल पृष्ठतो न सहजं गन्तुं बहिः शक्यते
मञ्जर्यो विनिवारयन्ति तु मधावाम्रस्य ता उद्गताः।
वर्षायां पतितानि पक्वसरसं जम्बूफलानि क्वचित्
किं भूमाविह तानि दद्युरपि मां गन्तुं पदाद् वा पदम्?॥15॥

यान्तं मामवलोक्य किं तरुरयं शाखाभुजैरङ्गणात्
सौप्रस्थानिकमाह वातचलितैराम्रो नु साम्रेडितम्।
यन्माता मम शैशवे कथयति स्माऽऽशीः किमात्थ त्वसौ-
गन्तव्यं किल चाक्षतेन कुशलं चायाहि चैवं तथा॥16॥

गेहान्मुक्तिमहं लभेय कथमप्येतद् विचार्य क्षणं
गेहद्वारमिदं विलङ्घ्य सहसा यातो बहिर्देहलीम्
बन्धं तत्र विलोक्य चातिजटिलं जाता त्वियं मे मति–
''र्मुक्तेर्द्वारमपावृतं किल मया त्यक्तं तु तत् पृष्ठतः॥17॥

हस्तैः स्वैः श्रमसन्नतैश्च कठिनैरुत्थाप्य भित्तीर्दृढा
ये निर्मान्ति गृहाणि ते स्वयमहो नैवाप्नुवन्ति च्छदिम्।
छायायै स्पृहयन्ति सन्ततमिमे गेहस्य ते कस्यचित्
ये कुर्वन्ति च कर्म वास्तुविधये दैनिन्दिनैर्भाटकैः॥18॥

भूयो भ्राम्यति चङ्क्रमीति चकितोऽसौ सम्भ्रमाद् बम्भ्रमन्
क्लेशैः क्लाम्यति ताम्यति प्रचलितो जानाति नासौ सुखम्।

अब्धिं चापि तितीर्षतीव विधुरो नौकां विना दुस्तरं
गेहा यस्य न सन्ति सोऽत्र पुरुषः श्राम्यत्यजस्रं भवे॥19॥

शेते कश्चन राजमार्गनिकषा कश्चित् तथा पद्धतौ
केचित् स्थानक एव शेरत इमे, केचित् तु सेतोरधः।
अन्ये निःशरणा रणे विनिहिता अज्ञायमाना यथा
योद्धारः स्वकलेवरं जहति ते नैव क्वचित् शोचिताः॥20॥

निर्द्वारं निरलिन्दमेव निभृतं निर्भित्ति निष्प्रस्तरं
गेहान् संरचयन्ति चापि सुदृढानीशा निरीहा अपि।
आकाशस्य छदिं दिशामतिदृढा भित्तीश्च वायोः पटं
कृत्वा कुटिमममत्र चैव धरणेः केचित् सुखं शेरते॥21॥

बहुशः खननेऽपि जले अप्राप्ते कश्चिद् वनजारो नरबलिं ददौ, तेन जलाप्लुतं सागरमध्यवर्ति सरोवरं सञ्जातमिति किंवदन्ती।

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी,

नवदेहली